CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

NALODAYA.

(ANNOTATED)

WITH THE PADÁS OR METRES DIVIDED.

PUBLISHED BY

ANANTA RAMKRISHNA KASHLIKER.

FOR THE USE OF THE

CANDIDATES FOR THE LITTLE-GO AND
OTHER EXAMINATIONS
OF THE
UNIVERSITY OF BOMBAY.

(Registered under Act XXV of 1867.)

BOMBAY:

PRINTED AT THE VICTORIA MERCHANT PRESS.

1869.

Price Rupees. 1½.

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नलोदयकाव्य.

हें

सटीक

पदच्छेद करवून

अनंत रामकृष्ण कशाळीकर.

यांणीं

मुंबईतील यूनिवर्सिटी संबंधी लिटलगो इत्यादि

परीक्षा देणाऱ्यांच्या उपयोगार्थ

छापून प्रसिद्ध केलें.

मुंबई

विकटोरीया मर्चंडप्रेस येथें छापिलें.

हें पुस्तक कायद्याप्रमाणें रजिस्टर केलें आहे व याचे सर्व

हक्क मालकानें आपल्याकडे ठेविले आहेत.

१८६९.

किंमत १॥ रुपया.

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रस्तावना.

नलोदयकाव्य हें कालिदासकृत आहे. यावर मैथिलश्रीप्रज्ञाकरमिश्र काविकृत सुबोधिनी नावाची टीका आहे. हें काव्य फार उत्तम असून शृंगारादि रसभरित आणि यमक इत्यादि कविता लावण्य ह्यांत उत्कृष्टच आहे. हें काव्य जगप्रसिद्ध असून पुस्तक दौर्लभ्यामुळें ह्या काव्याची सर्वांत प्रसिद्धि सांप्रत थोडी जहाली आहे व विद्वज्जनही या काव्याच्या पुस्तकाविषयीं यत्न करितात, परंतु तें कोठें मिळत नाहीं यास्तव सर्वांस तें पुस्तक सुलभ रीतीनें मिळावें व विद्वज्जन नवीन संस्कृतरूप आरामामध्यें क्रीडाकरणारे युनिवर्सिटी नामक लिटलगोष्ठी परीक्षा देणारे वगैरे सर्व या काव्याचा अंगिकार करतील ह्या बुद्धीनें मी हें पुस्तक शुद्ध करवून पदच्छेद व मोठें अक्षर इत्यादि जाजा रीतीनें छापावयाचें त्या त्या रीतीनें तें छापून प्रसिद्ध केलें आहे. तर जे रसज्ञ असतील ते याचा अंगीकार करतील अशी मी पूर्ण आशा करितों.

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नलोदयकाव्य.

कंकणफणिराजमणिन्दीपधियावदनमारुतैरसकृत् ॥
निर्वापयतिकुमारेसगिरिसुताजयतिसस्मितःशंभुः ॥१॥
नलोदयस्यसहसादुरूहस्यसुवोधिनीम् ॥
क्रियमाणस्यमेकुर्वद्रूपोस्तुशरणंशिवः ॥ २ ॥

हृदयसदायादवतः पापाटव्यादुरासदा
यादवतः ॥ अरिसमुदायादवत स्त्रिजग
गन्मागाःस्मरेणदायादवतः ॥ १ ॥

तत्रभगवान्कालिदासः प्रारीप्सितग्रंथसमाप्तिप्रतिबंधकविघ्नविघातायश्रीकृष्णस्मरणरूपंमंगलमादौनिबध्नाति त्हृदयेति हेत्हृदयअंतःकरण यादवतः यादवात्पंचम्यास्तसिल् त्वंमागाःमागछेः कथंभूतात् पापाटव्याःपापारण्याद्दुरासदायाःदुःखेनसोढुंशक्यायाः दवतः दवाग्नेःअरिसमुदायाच्छत्रुसमूहात्रिजगत्रैलोक्यंसदाअवतः पालयतोरक्षतोवा यद्वा कीदृशात्यादवतःदुःसोढायापापाटवी तस्याःदवाग्नेरिति रूपकंपुनःकीदृशात् अरिसमुहात्त्रैलोक्यमवतइति पुनः कीदृशात् स्मरेणकामेनदायादवतः पुत्रवतः दायादौसुतवांधवावित्यमरः ॥ १ ॥

योजनिनागोपीत श्चचारयोबल्लवांग
नागोपीतः ॥ भूयेनागोपीतः कंसाद्यो
द्वेषमेवनागोपीतः ॥ २ ॥

यइति यःनापुरुषः गोपीतःयशोदातःअगोपीतोदेवकीतोवाऽजनि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातःयःबल्लवाःआभीरास्तेषामंगनास्तासांगोभिर्नेत्रैः पीतःसन्सादर मवलोकितःसनूचचार दिङ्नेत्रघृणिभूजले लक्ष्यदृष्टयास्त्रियांपुंसि गोरित्यमरः येनभूरगोपिअरक्षि यःकंसाद्द्वेषमेवइतः प्रातःयेननागो पिकालियः कुवलयापीडोपिवाइतः दूरीकृतः यद्वा इतोऽस्मात्कंसा द्द्वेषमेवकेवलंनअपितुआगोपिअपराधमापिइतःप्राप्तः ॥ २ ॥

यदरिषुसन्नामान स्थितयोयन्नुन्नमुदलस
न्नामानः ॥ यत्रससन्नामानस्यु र्भवभाज
श्चपठितसन्नामानः ॥ ३ ॥

यदरीति यस्यारिषुमानस्थितयोऽभिमानाद्यस्थानमित्यर्थः यद्वा मा नश्चित्तसमुन्नतिः स्थितिर्मर्यादामानश्चस्थितयश्चेतिद्वंद्वः सन्नाअवस न्नाजाताइत्यर्थः नामसंभावनायांअनःशकटंयेननुन्नंप्रेरितंसत् उद लसत् चचालेत्यर्थः यत्रकृष्णससन्नामाः नमनंनामः संश्चासौनाम श्चेतिसंन्नामः सन्नामेनसहवर्तमानाः ससन्नामाः कृतसम्यङ्नतयः सांसारिकानस्युः कीदृशाःपठितसन्नामानः संतिचतानिनामानि चपठितानिवारंवारंगृहीतानिसन्नामानिगोविंदादीनियैस्तेपठितसन्ना मानः यद्वा यस्मिन्मालक्ष्मीः ससन्नासन्निकटा समीपेनिकटास न्नसन्निकृष्टसनीडवदित्यमरः तेनादूरदेशांतरवर्तित्वाविशिष्टासमीप स्थितेतियावत् आसन्नइतिआङ्उपसर्गासहितः अयंनिरुपसर्गः चपुनः पठितसन्नामानोभवभाजोनस्युः ॥ ३ ॥

समनिंदानवनाशं जनतालिकुलंयथैव
दानवनाशं ॥ द्विरदाद्दानवनाशं जगच्च
लभतेयतःसदानवनाशं ॥ ४ ॥

समेति जनताजनसमूहः यतोराज्ञःशंकल्याणंलभतेप्राप्नोतिच पुनः जगत् दानवानांदैत्यानांनाशंमृत्युंयतोलभते कीदृशीजनता समनिं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दानवना णुस्तुतौधातोल्युटि नवनंस्तुतिः निंदाचनवनंचनिंदानव नेसमेनिंदानवनेयस्याः सा जगत्कीदृशंसदाअनवनाशंअवनंरक्षणंत स्यआशाअवनाशानविद्यतेअवनाशायस्यतत् अनवनाशंयथाआलि कुलंकतृहस्तिसकाशाद्दानवनाशंप्राप्नोतिदानवनंदानजलंतस्यआश नंप्राशनंआशस्तंप्रातराशंसायमाशंचतद्वत् ॥ ४ ॥

अस्तिसराजानीते रामाख्योयोगतीः
पराजानीते॥यस्यरराजानीते रत्ना
निजनकुलेधराजानीते ॥ ५ ॥

अस्तीति सरामाख्योराजास्तीत्यन्वयः रामोभिरामः सुंदरइतियावत् आख्यानामयस्यसः यः नीतेर्नयस्यपराउत्कृष्टागतीः जानीतिजाना ति अनीतेः ईतिरहिततयाहेतौपंचमी यस्यकुलेसतिराज्यंकुर्वतिस तीतिशेषः जनः रराज सुखीबभूव यद्वा कीदृशस्य यस्यअनीतेः ईतिरहितस्य इतयोतिवृष्टयादयः कीदृशेकुले धराजानिभूम्युत्पन्ना निरत्नानिइतेप्राप्ते ॥ ५ ॥

यःसेनानावारि प्रकरनदीःशरमयंधुना
नावारि ॥ अतरन्नानावारि व्यसनै
र्यद्भुविवनंचनानावारि ॥ ६ ॥

यइति यःसेनानावासैन्यनौकयाअरिप्रकरनदीः शत्रुसमूहनदीरतरत् तीर्णवान् कीदृशीर्नदीः शरमयंबाणमयंवारिधुनानाः कंपयमानाः यद्भुविनापुरुषः व्यसनैर्नअवारिइतिकाकुः अपितुवारितएवचपुर्नय स्यवनंनानावारिनानागजबंधनयुक्तम् वारीतुगजबंधनीत्यमरः ॥६॥

अपियोदायादाय क्षयप्रदोंहासिसतांय
दायादायः॥करमादायादाय श्रियोब्धि
रधिराजमसिगदायादायः ॥ ७ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपीति यः अंहसिपापिज्ञातिदायादायपुत्रायापिक्षयप्रदः नाशकर्ता यदायाः यस्यआयाधनागमनानिसतांदायः न्यायप्राप्तोभागः पुनश्चयः अधिराजंराजानमधिकृत्यकरंआदायआदायश्रियः अब्धिः कीदृशःअसिगदायादाः असिश्चखड्गःगदाचअसिगदेयादांसिजलजंतवोयत्रसतथा ॥ ७ ॥

अविदूराजादित्या कृताल्पभेदैवभूः
सराजादित्या॥ येनसराजादित्या त्रि
दिवात्संयुक्तशत्रुराजादित्या॥ ८ ॥

अवीति येनभूस्त्रिदिवात्स्वर्गादल्पभेदैवकृता कीदृशी भूः अविदूराजाअविदूरेनिकटेअजौविष्णुहरीयस्याःसातया कीदृशात्रिदिवात् अदित्यादेवमात्राविशिष्टात् विशेषणेतृतीया पुनर्भूःकीदृशी सराजादित्यादितायच्छेदायहिताः दित्याः नदित्याः अदित्याः साधव इतियावत् राजसुक्षत्रियेषुआदित्याःराजादित्याः स्तेनसहवर्तमाना सातथासक्षत्रियश्रेष्ठेत्यर्थः अथवा राजादित्यनामानलभ्रातातेनसह वर्तमाना यद्वा राज्ञांमध्येआदित्योराजादित्यस्तेनयुक्तेत्यर्थः पुनः कीदृशात्रिदिवात् सराजदित्यात् राजाचंद्रः राजाचआदित्यश्चराजादित्यौताभ्यांसहवर्तमानात् येनकीदृशेनादित्यासंयुक्तशत्रुराजादितिर्दानमवखण्डनमितियावत् दोअवखण्डनेतयासंयुक्तः शत्रुराट् यस्यसतथातेन स्वखण्डनशत्रुणेत्यर्थः ॥ ८ ॥

खलसेनानावेद्यः स्वांहोब्धौभुविचयस्य
नानावेद्यः॥ स्निग्धजनानावेद्य प्रयतेस्य
सुकाव्यविरचनानावेद्य ॥ ९ ॥

खलेति स्निग्धजनान् आवेद्यनिवेद्य स्वांहोब्धौस्वकीयंदंहः पापंतदेवअब्धिस्तत्रसुष्टुयत्काव्यंतस्यरचनासैवनौर्नौकातस्यैयस्यरा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माख्यस्यअद्यइदानींप्रयतेयत्नंकुर्वे यस्यकस्यय: खलसेनान्दुष्टसैन्यं नअवेत् नरक्षेत् चपुनर्यस्यभुविसंसारेनानावेद्यः नानाप्रकारिकायज्ञ भूमिमण्डपप्रदेशाः संति ॥ ९ ॥

अथनिजराज्यंतेन प्राशासिनलेशत्रु
राज्यंतेन ॥ येनाराज्यंतेन श्रियादि
शोयस्यविहतिराज्यंतेन ॥ १० ॥

अथेति तेननलेन निजराज्यंप्राशासिशासितं कीदृशेन शत्रुराज्यं तेनशत्रूणांराज्याः शत्रुश्रेण्याअंतेनमृत्युना येनदिशः अराज्यंतअशो भंत कीदृशेनइनश्रियाइनवत्सूर्यवत् श्रीःशोभायस्यसतथातेनयस्यच आज्यंतेआजिर्युत्वंतस्यअंतेमध्येविहतिर्नसर्वत्रजयएवेत्यर्थः ॥ १० ॥

मूर्तिंमारसमानां योदधदायुःसहस्त्रमा
रसमानां॥रुद्रकुमारसमाना मजयद्वि
षतांपंक्तिमारसमानां ॥ ११ ॥

मूर्तिमिति यःसमानांवर्षाणांसहस्त्रमायुः आरप्रापऋप्रापणेधातोः पर्रो क्षायांआर किंकुर्वन् मारसमानांकामतुल्यांमूर्तिमाकारंदधत् धा रयन् यश्चद्विषतांशत्रूणांपक्तिंश्रेणीमजयज्जितवान् कीदृशीम् रुद्र कुमारसमानांरुद्रकुमारः कार्तिकेयस्तद्वत्समानांमानेनसहवर्तमानां पुनःकीदृशीम् आरसमानांशब्दायमानां ॥ ११ ॥

साश्वनियामानयतःश्रेष्ठाविद्यास्तदा
श्रयामानयतः॥ अधिकायामानयतः
शत्रावपियस्यधीर्दयामानयतः॥ १२ ॥

साश्वेति तदाश्रयास्तस्यनलस्याश्रयाऋतुपर्णप्रभृतयः यतोनलात् श्रेष्ठानतवंतीत्यध्याहार्यम् कीदृशात् नियमान्नियामः अश्वनियामेन

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहवर्तमानाः विद्याः मानयतः जानतः नियामोनियमोयामइत्यमरः यस्यमालक्ष्मीः नयतः नीतितः अधिकायाअधिकआयोयस्याः साकी दृशस्य शत्रावपिदयांआनयतःकुर्वतोधीःजिघांसारहितेतिशेषः ॥ १२

अहितानामायस्य त्राताय:शरणगा
मिनामायस्य ॥ गतनानामायस्य
श्रुत:पितावीरसेननामायस्य ॥ १३ ॥

अहितेति योनलः शरणगामिनोशरणगतानांआयस्योद्यमंकृत्वात्रा तारक्षिता चपुनः आयस्यधनागमस्य यस्यचवीरसेननामापिताश्रु तोविख्यातः कीदृशस्य गतानानामायाः यस्यासौतस्य आयस्येति यसुप्रयत्नेधातोः क्त्वायांल्यपि ॥ १३ ॥

भुव्यतनोदंतेन द्विषतांसयशांसिशोभ
नोदंतेन ॥ नीतानोदंतेन क्षितिमभज
न्नहितदंतिनोदंतेन ॥ १४ ॥

भुवीति सनलः भुवीपृथिव्यांद्विषतांशत्रूणामंतेननाशेनयशांसिअत नोद्विस्तारयामासचपुनः नोदनंनोदःप्रेरणमितियावत् येननोदंनीता अहितदंतिनः शत्रुहस्तिनोदंतेनाक्षितिमभजन्मृताइत्यर्थः कीदृशेन शोभनोदंतेन शोभनउदंतोवार्तायस्यासौसतेन वार्ताप्रवृत्तिर्वृत्तांत उदंतस्यादित्यमरः नुदप्रेरणइतिधातोर्नोदः ॥ १४ ॥

सचिवागिरागोपाय न्नलःसपृथिवीं
निरस्तारगोपायं॥शत्रोरागोपायं
नीत्वानेमुर्महत्तरागोपायं ॥ १५ ॥

सचिवेति सनलःनिरस्तरागोपायंयथास्यात्तथासचिवगिरामंत्रिवा क्येनपृथिवीमगोपायत् अरक्षत् रागस्योपायोरागोपायः व्यसनामि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तियावत् निरस्तोरागोपायोयस्यांक्रियायांतत्तादृशं महत्तरागोपा आगोपायं नीत्वायं नेमुर्नमश्चक्रुरित्यर्थः गांपृथ्वींपांतितेगोपाराजानः आगोपायं आगसोऽपराधस्यापायोनाशस्तंगोपाःकीदृशाः शत्रोर्मध्येमहत्तराः श्रेष्ठाः अगोपायदिति गुपूरक्षणेधातोः आगोपराधोमंतुश्चेत्यमरः दिग्नेत्रधृणिभूजलेइत्याद्यमरः नेमुरिति णमुप्रव्हत्वेधातोर्लिटिवहुवचनं ॥ १५ ॥

योदंभीमान्याया दधिकोथरिपुर्यमे
त्यभीमान्यायात् ॥ वैदर्भीमान्याया
त्रिजगतिकंन्याबभूवभीमान्यायात् ॥१६॥

योदंभीति भीमान्यायात् भीमभूपालाद्वैदर्भीकन्याबभूवजाता अननंआनः आनोस्यास्तीत्यानीआनीजीवितवान् आयोयस्य निरंतरंधनागमवानित्यर्थः राजेतियावत् भीमश्चासावान्यायश्चेति भीमान्यायस्तस्मात् वैदर्भीकीदृशी यात्रिजगतिमान्यापूज्या सकोभीमः योऽदंभीदंभरहितः पुनःकीदृशः आयात्धनवृद्धेर्हेतोर्मानीअभीमानी अथअधिकोरिपुः शत्रुर्यमेत्ययन्निकटे आगत्यभीमान्भीतः सन्यायात् प्रपलाय्यगच्छेत् भीतिर्भीःसाध्वसंभयमित्यमरः भीमान्मतुप् यायादितियाप्रापणेधातोः यत्तुभीमान्यायादित्यत्रभीमादिति पंचमीकल्पयित्वान्यायात् न्यायेनकन्याबभूवेतिव्याचक्षते तत्रसंधौ सतिनकारद्वित्वंतेनयमकत्वहानिरितिताच्चिंत्यम् ॥ १६ ॥

महिततमारंभाभि र्दमयंतीसदृगुमा
रमारंभाभिः ॥ दधतीमारंभाभि र्वद्ध
धेसोरुद्वयेसमारंभाभिः ॥ १७ ॥

महितेति दमयंतीववृधेवृत्तिंप्राप्तायुवतिर्बभूवेत्यर्थः कीदृशी उमार

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मारंभाभिः सदृक्सदृशी उमापार्वतीरमालक्ष्मीः रंभाऽप्सरोभेदस्ता भिरुमारमारंभाभिः कीदृशीभिः महितमारंभाभिः प्रकृष्टोमहितोम हिततमःपूजिततमइतियावत् महिततमआरंभोयासांतास्तादृश्यस्ता भिः पुनःकीदृशीभिःभाभिः कांतिभिर्मारंकंदर्पंदधतीधारयंती पुनःकीदृ शी ऊरुद्वयेरंभाभिःकदलीभिःसमा ॥ १७ ॥

युग्मं ॥ सारत्नंनारीणां नलःश्रियामज
निनिलयनन्नारीणां ॥ यस्यानन्नारीणां
मरुभुवमापद्घटावनंनारीणां ॥ १८ ॥

सेति सादमयंतीनारीणांमध्येरत्नंश्रेष्ठमजनिजाता नलश्चनारीणांम नुष्यसंबंधिनीनाश्रियांकांतीनांनिलयनंगृहमजनि नरस्येयंनारी यस्य चारिणांघटामरुभुवमापत् प्राप अवनंनापदितिपूर्वेणैवान्वयः मरु भुवंकथंभूतांआरीणांशून्यांधिकृतांवा अरीणांघटाकीदृशी अनन्नान विद्यतेअन्नंयस्याः साअनन्नाअवरीणोधिकृतश्चेत्यमरः ॥ १८ ॥

चकमेसाराजन्य श्रेष्ठंतंतांसतेजसाराज
न्यः ॥ आत्तविसाराजन्य श्रियोधितयया
जिताःससाराजन्यः ॥ १९ ॥

चकमेइति सदादमयंतीतंराजन्यश्रेष्ठं क्षत्रियोत्तमश्चकमेकामितव ती सचनलस्तांचकमेइतिपूर्वेणैवान्वयः तेजसाराजन् दीप्तिंकुर्वन् येनजन्याश्रियोयुत्वलक्ष्म्यः अधितप्राप्ताः कीदृशीः आत्तविसाराःवि सरणंविसारः विस्तारइतियावत् आत्तोगृहीतोविस्तारोयाभिस्ताः ययादमयंत्याजन्योवध्वोजिताः कीदृश्यः ससाराःसौंदर्यसहिताः सारःस्थिरांशेसौंदर्येइतिधराणिः युत्धमायोधनंजन्यम् समाःस्नुषाज नीवध्वइतिचामरः ॥ १९ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नार्तिर्नोद्यानेन प्रभाविहीनेनशोभनो
द्यानेन ॥ स्मरजानोद्यानेन स्फुटमि
तिगतिमिहनलोतनोद्यानेन ॥ २० ॥

नार्तीति नलः इतिहेतोरिहवनेस्फुटंयथास्यादेवंयानेनाश्वेनगतिंग मनमतनोदकरोत् इतिकिम् अनेनशोभनोद्यानेनसुंदरक्रीडावनेना द्यइदानींनोऽस्माकंस्मरजाकामोत्पन्नाआर्तिः पीडाननोद्येतिनअपितु नोद्यैवनाशनीयेत्यर्थःकीदृशेन इनप्रभाविहीनेनइनःसूर्यस्तस्ययाप्रभा किरणस्तेनविहीनेनरहितेन ॥ २० ॥

सोहितहंतापततः कांश्चिदपश्यो़द्ध
तायहंतापततः ॥ सस्नेहंतापततः
तान्यदमीतोषमावहंतापततः ॥ २१ ॥

सोहितेति अहितानांशत्रूणांहंतानाशकः सनलः हंतहर्षेकांश्चित्पत तःपक्षिणोऽपश्यदद्राक्षीत् कीदृशान्पततःहितायसुखदानायआपत तःआगच्छतःकीदृशः सःतापततः तापेनततोव्याप्तः कामज्वरपीडि तइत्यर्थः यद्यस्माद्धेतोरमीपतत्रिणोहंसास्तोषंसंतोषमावहंतअकुर्वं ततोहेतोः सस्नेहंस्नेहपूर्वकंयथास्यात्तथासोयंनलस्तान्हंसानापप्राप जग्राहेतियावत् ॥ २१ ॥

तंतरसारसमानः सविहंगगणोब्रवीत्स
सारसमानः ॥ गतहिंसारसमान तुद
लभ्योनिष्क्रयःस्वसारसमानः ॥ २२ ॥

तंतरसेति रसमानःशब्दायमानः ससारसमानः सारसैः पक्षिविशेषैः कृतोयोभिमानस्तेनसहितः सविहंगगणोहंससमूहतरसावेगेनतंनल मब्रवीदवदत् तदेवाह हेगतहिंसारसगतः हिंसायाः रसःप्रीतिर्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यसः तत्संबुद्धिःनोस्मान्मातुदमापीडय त्वयास्वस्यसारः सामर्थ्यादी रूपादिर्वातत्तुल्यनिष्क्रयोलभ्यः प्राप्यः अस्मत्तइतिशेषः ॥ २२ ॥

त्वंझषकेत्वंगत्वा दधिकोभैम्यास्तुमोंतिके
त्वंगत्वा ॥ सांतेकेत्वंगत्वा सक्तालत
त्सकाशकेत्वंगत्वा ॥ २३ ॥

त्वमिति हेअंगनलतुपुनस्त्वंझषकेत्वंगत्वात् झषकेतोःकामस्यांगंतस्य भावस्तस्मादधिकोनलःकामशरिरतोप्यधिकःसुंदरइतियावत् इतिभै म्याअंतिकेनिकटे त्वात्वांस्तुमःस्तोष्यामः साभैमीतेंऽकेक्रोडेतुपुनः अंगतुराजतुअगिर्गत्यर्थःकथंभूताआसक्ता त्वंतत्सकाशकेदमयंतीनि कटेस्वार्थेकः गत्वाललक्रीडांकुरु ॥ २३ ॥

इतिहंसारामाया निकटंयामयकृतेव
सारामाया ॥ जग्मुःसारामाया जगदु
श्चालीभिरभिससारामायाः ॥ २४ ॥

इतीति हंसाः सारामायाआरामेनसहवर्तमानासारामातस्याः सारा मायाःरमायाभैम्यानिकटंसमीपंजग्मुर्ययुः चपुनःइतिवक्ष्यमाणमूचुः यामयैनदैत्यशिल्पिनाकृतासाराउत्कृष्टामायेव या आलिभिः सखी भिःअमासहअभिससारगतिमकरोत् अमासहसमोपेचेत्यमरः ॥ २४

श्रीसंकाशास्यस्य त्वंभैमिनलस्यशशिनि
काशास्यस्य ॥ अरिलोकाशास्यस्य यदि
भार्यास्याःकुमारिकाशास्यस्य ॥ २५ ॥

श्रीति हेभैमित्वंयद्यस्यनलस्यभार्यास्याः भवेस्तर्हिश्रीसंकाशासि लक्ष्मीतुल्यासि श्रीवत्संकाशतेशोभतइतिसा कीदृशस्यनलस्य शशिनानिकाशंतुल्यमास्यंवदनंयस्यासौतस्यएवमरिलोकानांयाआ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शावांछातामस्यतिनाशयतीतिसः तस्यएवंकुमारिकाशास्यस्यकुमारिकाभिरपरिणीताभिःस्त्रीभिराशास्यस्यवांछितस्य ॥ २५ ॥

इतिहासेनोदितया गणेनभैम्यामुदार
सेनोदितया ॥ नवभासेनोदितया स्म
रेणसपुनर्नलौकसेनोदितया ॥ २६ ॥

इतीति इत्युक्तक्रमेणहासेनगणेनहंससार्थेनउदितयोक्तयामुदाआनंदेन हेतुनारसेशृंगारेनोदितयाप्रेरितयास्मरेणकामेनउदितयाउदयंप्राप्तयायुवत्येतियावत् एतादृश्याभैम्यानवभासेइतिनअपितुवभासेपुनस्तयाभैम्यासहंसगणोनलौकसेनलगृहायअनोदिप्रेषितः ॥ २६ ॥

ताबहुधावायस्य श्रेण्यःपुनरस्यसंनि
धावायस्य॥ तांचनिधावायस्य व्यनुवं
स्तुलनायनविबुधावायस्य ॥ २७ ॥

ताइति चपुनस्तावायस्यः हंसश्रेण्यः वयसांपक्षिणामिमाः वायस्योहंसपंक्तयोऽस्यनलस्यसंनिधौसमीपेआयस्यागत्यतांभैमींबहुधानानाप्रकारेणव्यनुवन् अस्तुवन्तुष्टुवुरितियावत् किंभूतेसंनिधौ आयस्यधनागमस्यनिधौआकरेआश्रयेवा अस्यकस्य यस्यतुलनायविबुधाअपिदेवाअपिनभवंतिवाशब्दोऽथार्थकः ॥ २७॥

इतिसविनामानितया जन्हेभैम्यानलो
पिनामानितया॥स्वास्थ्यंनामानितया
शिष्येचविचिंत्यतस्यनामानितया॥२८॥

इतीति इत्यनेनप्रकारेणविनाहंसेनमानितयापूजितयाकृतस्तुत्येति

Jagannath Bhâttarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गावत् नामसंभावनायांस्वास्थ्यंसुखमनितयाऽप्राप्तयातयाभिम्याधीरो विनलः जन्हेहतः वशीकृतइतियावत् चपुनस्तस्यनलस्यनामानि विचिंत्यनलनैषधेत्यादिचिंतयित्वाशिष्येसुप्तं कीदृक्नलः अमानितयानउपलक्षितः मानिनोभावोमानितातस्याअभावोऽअमानितातयानउपलक्षितः अभिमानयुक्तइतिभावः ॥ २८ ॥

अथससमुद्रागस्य क्ष्मांतस्यालंकृतेः
समुद्रागस्य ॥ यौवनसमुद्रागस्य स्व
सुतारत्नस्यसादमुद्रागस्य ॥ २९ ॥

दृष्ट्वाराजातनुतः स्वयंवरंविधिवादिंदि
राजातनुतः ॥ यस्यजराजातनुतः पृ
थगन्यथासौजनाद्रराजातनुतः ॥ ३० ॥

अथेति दृष्ट्वेति अथानंतरंसमुद्रश्च अगश्चसमुद्रागौताभ्यांसहितस्यक्ष्मांतस्यपृथ्वीपर्यंतस्यालंकृतेरलंकारभूतस्यसमुद्रागस्यमुदमानंदंरातिददातीतिसमुद्रः समुद्रश्चासावगश्चसः तेनसहवर्ततेइतिताहशस्य यद्वा राजाकीदृशःसमुत्सहर्षः द्राक्झटितिअस्यसुतारत्नस्येत्यर्थः यद्वामुद्रासौरागोऽनुरागः सचमुद्रागौताभ्यांसाहितस्य एवंयौवनमुद्रास्तनोद्रेकादिचिंन्हंतद्रस्यप्राप्तस्यएवंउद्रागस्यउत्उद्गतोरागोऽनंगरागोपीडावायस्यतस्य रागोमत्सरेलोहितादिषु क्लेशादावनुरागेचगांधारादाविंतिमेदिनी स्वसुतारत्नस्यसादंअवसादंकामजदुःखंदृष्ट्वेति द्वितीयेनान्वयः असौराजाभीमः स्वयंवरंविधिवत्तनुताकरोत् योराजा अतनुतःमहत्तोजनात्मनुष्यात् रराजशुशुभे यस्यतनुतोदेहात् जराजाजरोत्पन्नान्यथापृथक्भिन्ना बहुमध्येसुंदरोयुवाचेतिभावः कीदृशोराजा इंदेराजातनुतःइंदिरालक्ष्मीस्तस्याःसकाशाज्जातोयः कामस्तेननुतःस्तुतः कामाधिकसुंदरइतियावत् ॥ २९ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युग्मं ॥ तंहासेनापालिः स्वयंवरंक्षितिभुजां
ससेनापालिः ॥ नवभासेनापालिः स्रगेषुयैः
शिरसियारसेनापालि ॥ ३१ ॥

तमिति क्षितिभूजांराज्ञामालिः पंक्तिर्हासेनहर्षादिनातंदमयंत्याः स्व यंवरमापप्रपा यद्वा कीदृशीआलिः हासेनउपलक्षितेत्युपलक्षणेतृती या कीदृशीआलिः ससेनापालिः सेनापालयः सेनान्यस्तद्युक्ताप्र सास्रक्मालाएषुराजसुनवभासेइतिकाकुः अपितुशुशुभेइत्यर्थः सा का यास्रक्मालातैः राजभिः शिरसिरसेनस्नेहेनअपालिअरक्षिधृते त्यर्थः किंभुतास्रक्नापालिः अपगताअलयोयस्याः साअपालिः नअपालिः सभ्रमरेत्यर्थः तेषांशिरःसुइंद्रनीलादिमणिमत्तयाभृंगा भावेपिभृंगवत्तयामालाशोभतिस्मेतिध्वनिः ॥ ३१ ॥

तांगांसेनाराजिः स्वर्गसदांयैःसदार
सेनाराजि ॥ आयासेनाराजि क्षयित
रिपौचलतिविबुधसेनाराजि ॥ ३२ ॥

तामिति आजिक्षयितरिणेआजौसंग्रामेक्षयितानाशितारिपवः शत्र वोयेनसः तस्मिन्विबुधसेनाराजि विबुधादेवास्तेषांयासेनातस्यारा ट्सः तस्मिन्निंद्रेचलतिसतिस्वर्गसदांदेवानांसेनाराजिः सेनापंक्ति रायासेनश्रमेण तांगांविदर्भदेशोपलक्षितांभुवंआरप्राप यैःस्वर्गस द्भिः सदासर्वदारागेणभैम्यनुरागेणअराजिशोभितम् ॥ ३२ ॥

सोऽथपरमहस्तेन प्रापिनलेनोत्सवः
परमहस्तेनः ॥ स्फुरितपरमहस्तेन
प्रबभौरविणेवतत्पुरंपरमहस्तेन ॥ ३३ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सोथेति अथानंतरंपरमहस्तेनपरमउत्कृष्टोहस्तः करोयस्यसः तेन आजानुलंबितभुजेनेत्यर्थः सस्वयंवरः प्रापिप्राप्तः कथंभूतःस्वयंवरः परमहस्तेनः परेषांमहाः परमहास्तेषांस्तेनस्तस्करः महउत्सवः परमुत्कृष्टंतत्पुरंभीमनगरंतेननलेनप्रवभौशुशुभे केनकिमिव स्फुरित परमहस्तेन स्फुरितापरमाउत्कृष्टाहस्ताः किरणाः यस्यतेनरविणा अहःदिनामिव ॥ ३३ ॥

क्षिप्तलसन्नालीकान हितेषुमुखेंदुतुलित
सन्नालीकान् ॥ राज्ञःसन्नालीकान् कां
तिर्विबुधांश्चनाहसन्नालीकान् ॥ ३४ ॥

क्षितेति नालीनलस्येयंनालीकांतिःकान् राज्ञोनृपान्चपुनः कान्वि बुधान्नाहसदपितुसर्वानेव कीदृशान् अहितेषुशत्रुषुक्षिप्तलसंन्नाली कान्क्षिप्ताः प्रेरिताः लसंतोदीप्यमानानालीकाबाणविशेषायैस्तान् एवंमुखेंदुतुलितसंन्नालीकान्मुखेंदुभिस्तुलितानिसंतिसमीचीनानि नालीकानिपद्मानियैस्तान् एवंसंन्नालीकान्संन्नपगतमलीकंकप टादियेषांतेतान्षट्लविसरणगत्योः क्तः ॥ ३४ ॥

अजनिजलापास्यंतं स्वयशोऽनिजकं
महःकलापास्यंतं ॥ शत्रुकलापास्यंतं
प्रेक्ष्यनलंसुरततिःकलापास्यंतं ॥ ३५ ॥

अजनीति सुरततिर्दैवपंक्ति स्तंनलंप्रेक्ष्यदृष्ट्वाजलाजडाःकिंर्तव्यतामू ढाजातेत्यर्थः डलयोरभेदात्कीदृशंनलम् स्वीयंयशःआस्यंतंरक्ष तम् अनिजकमस्वकीयंमहस्तेजःप्रभुत्वमपास्यंतमरक्षंतम् यद्वा निजकंस्वकीयंमहस्तेजःआपास्यंतंदूरतः प्रसारयंतमित्यर्थः एवंश त्रुकलापास्यंतंशत्रूणांकलापाः समूहास्तानस्यतिक्षिपतीतिसःतम्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथवाअस्यंतःअसिनाअंतोयस्यएतादृशःशत्रूकलापोयस्य एवंकलापास्यंकलांपातीतिकलापश्चंद्रस्तत्सदृशमुखम् कलापोभूषणेबर्हेतूणीरेसंहतेपिचेत्यमरः ॥ ३५ ॥

स्वर्निलयानामनलं कृतमपिजेतुंततिःश्रि
यानामनलं ॥ यमजेयानामनलं प्रोचेश
क्रस्तमरिचयानामनलं ॥ ३६ ॥

स्वरिति शक्रइंद्रस्तंनलंप्रोचेउवाच नामसंभावनायांतंकंयमनलंकृतमप्यलंकाररहितमपिनलंस्वर्निलयानां देवानांततिःश्रेणिः श्रियाशोभयाजेतुंतिरस्कर्तुमनलंनअलंसमर्थाः किंभूतंनलं अजेयानामन्यैर्जेतुमशक्यानामरिचयानांशत्रुयूथानामनलमग्निंदाहकत्वात् ॥ ३६॥

वदकामायासन्न स्त्वंभैम्यैयद्गुणाःश्रमा
यासन्नः ॥ श्रेष्ठतमायासन्न स्त्वांद्रष्टा
नतुजनःस्वमायासन्नः ॥ ३७ ॥

वदेति हेनलत्वंतस्यैभैम्यैनोऽस्माकंकामायासंकामेनकृतोयःआयासस्तंवदत्वत्कृतेदेवान्कामःपीडयतीतिभावः तस्यैकस्यै यद्गुणाःयस्याःगुणानोऽस्माकंश्रमायखेदायआसन्अभूवन्शमायेतिपाठेशांत्यैइत्यर्थः अथचयाश्रेष्ठतमाअत्यंतमुत्कृष्टा तुपुनस्तत्रेत्यर्थात् आसन्नोजनोद्वारपालकादिस्त्वांनद्रष्टानद्रक्ष्यति कीदृशस्त्वम् स्वमायासंनःस्वस्यतवमत्प्रसादजन्यायामायाकपटःतयासंनआच्छंनः ३७

इतिसरवेकेहास्तं न्यस्यसमुकुलंसुरप्रवे
केहास्त ॥ तामविवेकेहास्तः श्रयतिस्त्री
तत्रपार्थिवेकेहास्त ॥ ३८ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इतीति सुरप्रवेकेसुरेश्रेष्ठेइंद्रेइतिउक्तप्रकारेणसर्वसेशब्देसतिइंद्रेएव मुक्तवतिसतीत्यर्थः केमस्तकेहास्तंहस्तसंबंधिमुकुलंन्यस्यमस्तकेंऽजलिंकृत्वासनलः तांदमयंतींअहास्तजगाम कीदृशःसः अविवेकेहास्तः अविवेकस्याज्ञानविशेषस्ययाईहाचेष्टातयाअस्तःरहितः यद्वानलंदृष्टवतीदमयंतीनान्यंवरिष्यतीतिइंद्रस्ययोऽविवेकस्तज्जनियद्वानलंदृष्टवतीदमयंतीनान्यंवरिष्यतीतिइंद्रस्ययोऽविवेकस्तज्जनितयाचेष्टयाआस्त प्रेषितइत्यर्थः पार्थिवेनलेश्रयतिगतवतिसतिकास्त्रीइहस्थलेअस्तःअतिष्ठत् नकापीत्यर्थः ॥ ३८ ॥

हरिपवमानयमानां दूतोस्मिनलोमहारमानयमानान् ॥ भवतींमानयमानान् भैमिसुरान्विद्धि महामिमानयमानान् ॥ ३९ ॥

हरीति हरिरिंद्रोऽग्निश्चपवमानोवरुणोवायुश्चयमः कृतांतस्तेषांदूतो नलनामाहमस्मि इमानिंद्रादीन्सुरान्महत्तवस्वयंवरमयमानान्प्राप्तान्विद्धिजानीहि कीदृशान् महारमानयमानान्रमालक्ष्मीःनयोनीतिःमानश्चित्तसमुन्नतिः महांतोरमानयमानायेषांतेतान् एवंभवतींत्वांमानयमानान्सर्वांकुर्वतः ॥ ३९ ॥

तुल्यैऽप्सरसादेहि प्रभवोमग्नाःस्मरप्रसरसादे हि ॥ तानभिसरसादेहि स्रजंचनाकात्सुखं चसरसादेहि ॥ ४० ॥

तुल्यइति हेअप्सरसातुल्येरंभादिसदृशेदेहिप्रभवोमनुष्यादीनामीश्वरादेवाः स्मरप्रसरसादेस्मरस्ययःप्रसरः प्रसारस्तज्जन्येसादेदुःखेमग्नाः हियतः अतःसात्वंतान्देवानभिसरस्वीकुरु चपुनःस्रजंमालां देहि सरसादमृतादियुक्तान्नाकात्स्वर्गात्सुखमेहिप्राप्नुहि ॥ ४० ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति कृतसामारवतः सुरलोका त्तन्मुखेन
सा मारवतः॥ न रिरंसा मारवतः स्थला
दिव नलोत्कमानसा मारवतः ॥ ४१ ॥

इतीति साभैमीसुरलोकादिंद्रादिदेवगणात् रिरंसांरंतुमिछांक्रीडांन आरंनप्राप किंभूतात्तन्मुखेननलमुखेनइतिपूर्वोक्तन्यायेनकृतसामारवतः कृतःक्षामस्यसांत्वनायाः आरवःशब्दोयेनततः एवंमारवतः मारोमदनस्तद्दतः बतखेदे कीदृशीसानलोत्कमानसानलेउत्कमुत्कंठितंमानसंचेतोयस्याःसा कस्मादिव मारवतःस्थलादिव मरोरिदंमारवंताद्दशात् स्थलादिवमरुसंबंधिदेशादिवयथाहंसः नलोत्कमानसः नलेजलोत्पन्नपदार्थेबिसेउत्कंठिताचित्तोमरुसंभूतवस्तुतोरिरंसांनाप्नोति यद्वा कृतसामेतिदमयंत्याविशेषणंकृतंसामसांत्वनंयया साआरवतः शब्दंकुर्वतइति सुरलोकाविशेषणम् ॥ ४१ ॥

सा विरराजा यतया वीक्ष्य दृशा तं स्मरा
तुरा जायत या ॥ स्थिति रत्रा जायतया
द्युसदां चा भावि निषधराजाय तथा ॥४२ ॥

सेति साभैमीविरराजविशेषेणशुशुभे साका याआयतयाविशालयादृशादृष्ट्याअत्रभवनेतंनलंवीक्ष्यदृष्ट्वास्मरातुराकामव्याप्ताऽजायतअभूत् चअपरंतयाभैम्यानिषधराजायनलायद्युसदांदिविसीदंतीतिद्युसदादेवास्तेषांस्थितिः स्थानंअजायतयाजायायाः भावोजायतानजायताऽजायतातयाऽभाविअवादिस्त्रीत्वेनदेवान्नवृतवतीतिभावः४२

तस्या देवाद्यस्य प्रणम्य च नलेन धीः पदे
वाद्यस्य ॥ साति निनदे वाद्यस्य स्वयं
प्रियायाः पदं मुदे वाद्यस्य ॥ ४३ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्याइति नलेनास्यदेवाग्रस्यसुरमुख्यस्येंद्रस्यपदेचरणेप्रणम्याभि वाद्यतस्याभैम्याः धीबुद्धिरवादिउक्ता कस्मिन्सतिवाद्यस्यतूर्यादे र्निनदेशब्देसति यस्यनलस्यमुदेआनंदायप्रियायाः पदंवाक्यंअवात्प्रा प यद्वा अस्यकस्ययस्येंद्रस्यमुदेहर्षायप्रियायाः पदंस्थानमवाज्ज गामनलइतिशेषःभैमीत्वांनवृणुतइत्युक्तवानितिभावः ॥ ४३ ॥

अथ तरसा रंगे यं नृपतिगणो ऽस्थित
पदेषु सारं गेयं ॥ चंचलसारंगे यं दमयं
तीचा क्षितुलितसारंगे यं ॥ ४४ ॥

अथेति अथानंतरमयंनृपतिगणोराजलोकोरंगेस्वयंवरसभायांतरसा वेगेनपदेषुभीमकल्पितमंचस्थानेषुअस्थितआसीत नृपतिगणःपदा न्यकृतइतिदाठेपदानिचरणविन्यासान्अकृतअकरोदित्यर्थः किंकुर्व न् सारमुत्कृष्टंगेयंअयत्गीतंशृण्वन्नितिभावः गत्यर्थोज्ञानार्थःकीदृशे रंगे चंचलसारंगेसौरभ्याधिक्येनचंचलाःसारंगाःभ्रमराः यत्रतादृशे य द्वाचंचलसारंगेखेलत्पक्षिविशेषेइत्यर्थः यद्वा चंचलागमनागमनशी लाःसारंगागजायस्मिन्तस्मिन्नित्यर्थःचपुनरियंदमयंतिस्वोचितपदेषु अस्थितइतिपूर्वेणान्वयः कीदृशीयंअक्षितुलितसारंगाअक्षिभ्यांतुलि तःसारंगोमृगोययासासारंगश्चातकेभृंगेकुरंगेचमतंगजेइत्यमरः ४४

व्यधु रवना मान्येषु प्रजा नृपे ष्वथ निवेद्य
नामा न्येषु ॥ सूतै र्नामान्येषु प्रकीर्त्यमा-
नेषु शोभना मान्येषु ॥ ४५ ॥

सां गेन नलसमाना न नलसमानान मुत्र
कतिचि त्पुरुषान् ॥ प्रैक्षत न नलसमाना
ननलसमा नभू न्नतेषां भेदः ॥ ४६ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यधुरिति सागइति युग्मम् अथ एषुनृपेषुराजसुनामानिनिवेद्यउक्त्वा सूतैर्मागधैः प्रकीर्त्यमानेषुस्तूयमानेषुवंदिभिः कृतपरिचयेषुसत्सु तथानामसंभावनायां अन्येषुमान्येषुदेवेषुप्रकीर्त्यमानेषुसत्सुएषुकेषु येषुनृपेषुप्रजास्तत्रत्याजनाअवनामानमस्कारान्व्यधुश्चक्रुः साशोभनाभव्याभैमीअमुत्रस्वयंवरेकतिचित्पुरुषान्नैक्षतइतिनाकिंतुददर्श कीदृशान्अनलसमानानग्नितुल्यान् एवंनलसमानांदेदीप्यमानान् एवंअनलसमानान्नअलसमानाअनलसमानास्तान् अंगेनशरीरेण नलसमानान्नलेनसदृशान्यतस्तेषांनलसमानांपुरुषाणामिंद्रादीनां भेदोविविच्यज्ञानंनाभून्नजातं ॥ ४५ ॥ ४६ ॥

रुचिकृतनासत्यागाः स्फुरतु नलो यदि च
वच्मि ना सत्या गाः ॥ अपि दीना सत्यागां
न्याययुतेनै व वर्त्मना सत्यागा ॥ ४७ ॥

रुचीति चपरंयद्यहंसतीसाध्वीयद्यहंअसत्याःगावाणीःनवच्मिनवदामि तथादीनापियदिन्याययुतेनैववर्त्मनाधर्ममार्गेणैवआगांगच्छामि यद्यहं सत्यागात्यागेनदानेनसहवर्तमानातदानलः स्फुरतुइंद्रादिभिन्नत्वेनज्ञानविषयोभवतु कीदृशोनलः रुचिकृतनासत्यागाःरुच्याकांत्याकृतः नासत्ययोर्दस्रयोः आगोऽपराधोयेनदस्राधिकसुंदरइतियावत् ॥ ४७ ॥

यदि वा भावं न्यस्य स्थिता स्मि नल एव
नरविभा वन्यस्य ॥ देवसभा वन्यस्य द्विपस्य
वपुषो भवे द्विभा वन्यस्य ॥ ४८ ॥

यदिवेति वासमुच्चयेयदिचेत्यदिअन्यस्यान्यस्मिन्पुरुषेभावंचित्ताभिप्रायंन्यस्यत्यक्त्वा निपूर्वस्यासुक्षेपणइत्यस्यन्यस्येतिरूपम् अहंनल

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवस्थितास्मितिष्ठामिवर्ते तर्हि अस्यनलस्यवपुषः शरीरस्यविभा कांतिःअवनीशक्षिकाभवेत्भवतु कीदृशेनले नरविभौनराणांविभुर्नरविभुस्तस्मिन् कीदृशस्यवपुषः देवसभावन्यस्यद्विपस्य देवानांसभैववनंतत्रोत्पन्नस्यद्विपस्यहास्तिनः अन्योपिद्विपोवन्योभवति ४८॥

कृतभावा सा वनिता नितिभुव मैक्षत् सुरान्
सुवासा वनिता ॥ स्वपतिं वा सावनिता
चिन्हं धार्मिकजने ध्रुवा सा वनिता ॥ ४९ ॥

कृतेति असौवनिताभैमीभुवंभूमिमनितान्अप्राप्तान्भूमिस्पर्शरहितान्सुरान्देवानैक्षतापश्यत् कथंभूतासा इत्यनेनप्रकारेणकृतभावा कृतोभावश्चित्ताभिप्रायोययासा एवंसुवासाःसुष्ठुशोभनंवासोवस्त्रंयस्याःसा वाशब्दश्चार्थःचपुनःस्वपतिंनलंऐक्षत् कीदृशंस्वपतिंअवन्यासहवर्त्तमानःसावनिःतस्यभावःसावनितासैवचिन्हंयस्यतंभूमियुक्तपादत्वात्देवभिन्नत्वेनअपश्यदित्यर्थः देवानान्तुतद्राहित्यंस्वाभाविकं तंकम् यस्यनलस्यअवनिताअवनंरक्षणमस्यास्तीत्यवनीअवनिन्नोभावोऽवनितारक्षणवत्ताधार्मिकजनेसाधुनिजनेध्रुवानिश्चिताआसभवतिस्मआसेतिवभूवार्थेऽव्ययम् ॥ ४९ ॥

स्वरिरंसा देवाल्याकुलया दृष्टचा र्थिता
पि सा देवाल्या ॥ वपुषि ससादे वाल्या
दवृत नल मुपस्थितं रसा देवाल्या ॥ ५० ॥

स्वेति साभैमीआल्यासख्याकरणेनरसादेवप्रीतेरेवतंनलमवृतअवृणुत कीदृशंनलं उपस्थितंसमीपेतिष्ठंतम् कस्मिन्सति बाल्याद्बाल्यमारभ्यवालानवयौवनातस्याभावोबाल्यंतस्मात्बाल्यात्धेतोर्वावपुषिससादेसतिसखेदेसति कीदृशीसा देवाल्यादेवपंक्त्याअर्थिता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पियाचितापि एवंदृष्ट्याद्दशास्वरिरंसादाइवस्वस्यारिरंसारंतुमिछा तांददातीतिस्वक्रीडाप्रदाइव कीदृशादृष्ट्या अल्याकुलया भ्रमरइवचंचलया ॥ ५० ॥

सत्सदसो माननया रुद्रसमो यः स्वतेज
सो माननया ॥ प्रवृतः सोमाननया नलो
बभौ भुवि गुणेन सो माननया ॥ ५१॥

सदिति सनलोबभौशुशुभे कीदृशः अनयासोमाननयाचंद्रवदनया भैम्याप्रवृतः पतित्वेनस्वीकृतः सकःयःसत्सदसः सतांदेवानांसाधूनांवायत्सदः सभातस्याः यामाननातयारुद्रसमः शिवसदृशः रुद्रांशत्वात् अनयाकयास्वतेजसापातिव्रत्येनउमानेतिनकिंतूमैवएतेन शिवपार्वतीयोगोपिवर्णितः कीदृशोनलः गुणेनशौर्यादिनाभुविपृथिव्यांअमानूनमातीत्यमान् अधिकगुणइत्यर्थः ॥ ५१ ॥

मदृदंभा वर मस्यत् ज्ञात्वा थ मनो
गुरुप्रभावरमस्य ॥ सुरवृषभा वर मस्य
प्रदिश्य जग्मु र्गतप्रभावरमस्य ॥ ५२ ॥

मदेति अथसुरवृषभादेवश्रेष्ठाइंद्रादयोऽस्यनलस्यवरंप्रदिश्यदत्वाजग्मुर्ययुः वरदानेहेतुमाह अस्यनलस्यमनश्चित्तंमदृदंभौमदश्चदंभश्चतौअरंझटितिअस्यत्त्यजत्तज्ज्ञात्वा कीदृशस्यास्यगुरुप्रभावरमस्य प्रभावश्चरमाचप्रभावरमेगुर्व्यौप्रभावरमेयस्यतस्य यद्वा गुर्वीप्रभावेनरमालक्ष्मीर्यस्य एवंगतप्रभावरमस्य गतोनष्टः प्रभायाः कांतेरवरमोऽशोभनत्वंयस्मात्सः तस्यातिशयितकांतेरित्यर्थः ॥ ५२ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुरुमहिमा परमाया स्तंभी नल एष वसति
माप रमायाः ॥ प्रियया माप रमायाः स्वपुर
मगु र्यत्र तं क्षमापरमायाः ॥ ५३ ॥

गुर्विति एषःनलः प्रिययाभैम्याअमासहतत्स्वपुरंस्वनगरमापप्राप स्यादमासंन्निधानार्थेसहार्थेइतिहेमचंद्रः कीदृशः गुरुमहिमामहतो भावोमहिमागुर्वीमहिमायस्यसः एवंपरमायास्तंभीपरेषांशत्रूणां यामायातस्याः स्तंभीरिपुकपटनाशकइत्यर्थः कीदृशंस्वपुरं परमा याउत्कृष्टायाःरमायाः लक्ष्म्याः वसतिंस्थानंतत्किंयत्रपुरेआयाः धनागमनानिक्षमापरंसहिष्णुताशीलंतंनलमगुःआपुः ॥ ५३ ॥

शशिना समहासमहा नगरे जनता समहा
समहास्त मुदं ॥ अति भासुरया सुरया व्य
हर द्यतनो त्सुरया सुरयागमपि ॥ ५४ ॥

इतिश्रीनलोदकाव्येकालिदासकृतौ
प्रथमोल्लासः ॥ १ ॥ ॥ ॥

शशिनेति जनताजनसमूहः नगरेनलपुरेमुदंहर्षंसमहास्तप्रापओ हाङ्गताविस्यस्यधातोः प्रयोगः येगत्यर्थास्तेप्राप्त्यर्थाज्ञानार्थाश्च किंभूताजनता शशिनाचंद्रेणसमहासमहा समंहासस्यमहस्तेजोय स्याःसा महश्चोत्सवतेजसोरित्यमरः एवंसमहामहेनउत्सवेनसहव र्तमानासाएवंसुरयाशोभनोरयः शब्दोयस्याःसासुरयापुनः जनतैव सुरयामदिरयाव्यहरच्चिक्रीड सुरयागमपिदेवार्चनमपिव्यतनोदक रोत् कीदृश्यासुरया भासुरयास्वच्छया ॥ ५४ ॥ इतिश्रीनलो दय[टी]कायांसुबोधिन्यांप्रथमोल्लासः ॥ १ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ रति रेकांतेन प्रापि नलेना त्र मंदिरे कांतेन ॥ तां पुन रेकांतेन प्राप्तवता रिपु-मदातिरेकांतेन ॥ १ ॥

अथेति अथानंतरंकांतेनकमनीयेन एवंतांभैमींपुनरेकांमहींचप्राप्तवतायद्वा एकांमुख्यांतांभैमीमिवप्राप्तवता एवंरिपुमदातिरेकांतेनरिपूणां शत्रूणांमदोगर्वस्तस्यातिरेक आधिक्यंतस्यांतेननाशकेन तेननलेन एकांतेनातिशयेनात्रमंदिरेरतिः क्रीडाप्रापिप्राप्ता यद्वा एकांतेत्रमंदिरेरतिः नप्रापीतिनकिंतुप्राप्तैवकाक्वर्थेनञ् ॥ १ ॥

बभौ स सारसागर श्चकास सा रसार्द्रधीः॥ मधुः ससारसारव स्तदा ससार सार्तवः॥ २ ॥

बभाविति सारस्यबलस्यसागरःसमुद्रः सनलोबभौशुशुभे सारोबलेस्थिरांशेचेत्यमरः एवंरसार्द्रधीः रसेनप्रेम्णाआर्द्रारसकोमलाधीर्बुद्धिर्यस्याः सादमयंतीचकासशुशुभे तदातस्मिंनवसरेमधुर्वसंतः स सारआजगाम मधुश्चैत्रर्तुदैत्येष्विति हेमचंद्रः कीदृशोमधुः ससारसारवः सारसानामारवःशब्दस्तेनसहितःपुनःकीदृक् सार्तवः ऋतौभवमार्तवंपुष्पादितत्सहितः सृगतावित्यस्यलिटिससारेति ॥ २ ॥

समुदधिता शालीनां करेण कणिशाग्ररुचि जिता शालीनां ॥ दिनभर्ता शालीना मिव नलिनी मथ समुत्थिता शालीनां ॥ ३ ॥

समुदधीति दिनभर्त्तासूर्यः करेणकिरणेननलिनींसमुदधितसमुत्थापितवान्विकासयामासेतियावत् अथानंतरमलीनांभ्रमराणामाशाइच्छासमुत्थिताउदिता कीदृशेनकरेण शालीनांधान्यानांकणिशाग्ररुचिजिताकणिशाग्रस्ययारुक्तांजयतीतितत्तेनव्रीहिमंजर्यग्रकांति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जिता कणिशंशस्यमंजरीत्यमरः कीदृशींनलिनीं आशालीनांचंद्र करस्पर्शात्आशासुदिक्षुलीनांअदर्शनगताम् कामिवशालीनामिव लज्जितामिव अन्यापिपरपुरुषकराकृष्टालज्जिताभवति परपुरुषभ क्तापिस्वामिनानत्यक्ताकरेणोद्धृतातत्रखिङ्गानांआशाभवतीतिभावः अलिःखिङ्गेचषट्पदेइतिरंतिः ॥ ३ ॥

कु रवाप च सारसकाकुरवान् कुरवाख्य नगो
पि तदा कुरवान् ॥ क मलं कृतव द्धतपं
क मलं क मलं न विलोभयितुं कमलं ॥ ४ ॥

कुरवापेति तदावसंतकालेकुः पृथिवीसारसकाकुरवान्सारसानांका कवोमनोहरायेरवाः शब्दास्तानवापप्राप कुरवाख्यनगोपिकुरुव कवृक्षोप्यंकुरवान्जातइतिशेषः कमलंपद्मकंजलंअलंकृतवत्ऽशोभ यत् एवंकंपुरुषंविलोभयितुंनअलंअपितुसर्वानेवरंजयितुंसमर्थं की दृशंकम् गतपंकमलंगतः पंकरूपोमलोयस्यतत् तंकर्दमरहितमि त्यर्थः ॥ ४ ॥

अगु रतिमहिमानीतः ततो रविमहांसि
गुरुतमहिमानीतः ॥ भवनं महिमानीतः
स्मरेण परितःशराख्यम हिमा नीतः ॥ ५ ॥

अगुरतीति रविमहांसिसूर्यतेजांसिगुरुतमहिमानीतः अतिशयेनगु रुर्गुरुतमागुरुतमाचासौहिमानीचसातयाततः पंचम्यास्तसिः इत स्ततःअगुःप्रासरन् कीदृशानिरविमहांसिअतिमहिमानिअत्यंतंम हिमायेषांतानिमहाप्रभावाणि मानीअभिमानीसनलः महिमहउ त्सवस्तद्युक्तंभवनंप्रासादमितःप्राप्तः कीदृशोमानीपरितः समंतास्म रेणकामेनशराख्यमहिंसर्पमानीतःप्रापितः सर्पसदृशस्वबाणगोचरी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतइत्यर्थः कामपीडयारविरश्मिप्रतापेनचबहिः स्थातुमशक्नुवन् गृहंगतइतिभावः ॥ ५ ॥

स्मरसूचितया जगतः क्षितिसूचितया भव
द्धि चंपकमुकुलं ॥ तद सूचितया व्यथया
निरसूचितया यया वियु क्तदंपतिकौ ॥ ६ ॥

स्मरेति हिनिश्चयेतच्चंपकमुकुलंचंपककुड्मलंस्मरसूचितयाअनंगसूचेर्भावत्वेनाभवत्जातम् तत्किम् यन्मुकुलम् जगतः क्षितिसूचितया जगतःसंसारस्यक्षितौप्रहारेसुतरासुचितयायोग्यतयातयातज्ज्न्ययान्यथयाअसूचिज्ञापितम् तयाकया यया चितयावृद्धिंप्राप्तया व्यथयावियुक्दंपतिकौविरहितस्त्रीपुरुषौनिरसूगतप्राणौकृतौ स्वार्थेकः ॥ ६ ॥

विरलोच्चपलाशस्य प्रचुरं पुष्पं बभूव च
पलाशस्य ॥ स्मरनीचपलाशस्य प्रा
श्या ध्वगपिशितचारु च पलाशस्य ॥ ७ ॥

विरलइति चपुनः विरलोच्चपलाशस्यविरलानिअप्रचुराणिउच्चानि पलाशानिपत्राणियस्य पत्रंपलाशंछदनंदलंपर्णंछदःपुमानित्यमरः तस्यपलाशस्यब्रह्मवृक्षस्यप्रचुरंपुष्पंबभूवजातम् कीदृशंपुष्पम् चपलाशस्यचपलाआशातृष्णायस्यतस्यस्मरनीचपलाशस्यस्मरएवनीचस्तुच्छः पलाशोमांसाशीराक्षसस्तस्यप्राश्याध्वगपिशितचारुप्राश्यंभक्षणयोग्यंयत्अध्वगस्यपथिकस्यापिशितंमांसंतद्वच्चारुमनोहरं पथिकप्राणहारकत्वेनस्मरस्यराक्षसतुल्यत्वम् ॥ ७ ॥

ऋतौ बभु र्निशाङ्कया विभाविभाविभा विभाः ॥
कला श्च तेषु सत्पते रदा रदारदारदाः ॥ ८ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऋताविति विभाविभाविभौविभावोरत्यादिकारणंविद्यतेयस्याः सा विभाविनीभाकांतिस्तयाविभौव्यापकेऋतौवसंतेनिशाव्हयाइभाः निशैवाव्हानामयेषांतेइभाहस्तिनः मदजनकत्वात् रात्रिरूपाहस्तिनइतिरूपकम् बभुः शुशुभिरेचपुनस्तेषुरात्रिलक्षणगजेषुसत्पतेश्चंद्रस्यकलाः रदादंताःबभुःकीदृशाःरदाःअदारदारदाः अदाराः जायारहितास्तेषांदारदाः दारंहृदयविदारणंददतीतिते यद्वा किंभूतेऋतौ विभौविशेषेणशोभमाने किंभूताइभाः विभाःविशेषेणशोभमानाः किंभूतारदाः विभाः विशेषेणशोभमानाः ॥ ८ ॥

इह ललनाशोकालि प्रदेन येना त्ममदविं
नाशोकालि ॥ कामेना शोकालिस्वनहूंकृ
तिभिः सदिक्ष्वनाशो कालि ॥ ९ ॥

इहेति इहवसंते ललनाशोकालिप्रदेनयेनललनास्त्रीतस्याःशोकस्यालयःपंक्तयस्ताःप्रददातिकामिनीविरहंविस्तारयतायेनपुरुषेणात्ममहविनाशः आत्मनोयोमहःकामोत्सवस्तस्यविनाशः अकालिअकारिसपुरुषः दिक्षुदिशासुअशोकालिस्वनहूंकृतिभिरशोकवृक्षसंबंधिनोयेअलयोभ्रमरास्तेषांस्वनाः शब्दास्तएवहूंकृतयस्तर्जनावाचस्ताभिःकरणेनकामेनअनाशः आशावांछातयारहितोपिअकालिअबंधिजितेंद्रियोपिवसंतेभ्रमरशब्दादिनाबद्धोभवतीतिभावः अथवानविद्यतेनाशोयस्यसमृत्युंजयतुल्योपिकामेनअबद्धिइत्यर्थः ॥ ९ ॥

स्मरस्य युद्धरंगतां रसारसारसारसा ॥ जिता
वियोगिनः समुन्नतेन तेनतेन ते ॥ १० ॥

स्मरस्येति सारसारसासाराःश्रेष्ठाःसारसाः पक्षिणोयस्यांसा रसापृथ्वीस्मरस्य युद्धरंगतांसमरभूमिभावं आरप्रापसमुन्नतेनतेनसम्यक

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकारेणोन्नताउत्कृष्टाइनता प्रभुतायस्यसतेनतेनकामेनतेपुरुषाजिता स्ववशीकृताःतेके येवियोगिनः सस्त्रीकाःस्त्रीरहितावा स्मरतापपराजिताःसंतःस्त्रीभिःसहासक्ताबभूवरितिभावः यद्वा कीदृशीरसासारसारसा आरस्यतइत्यारसःशब्दःसारसानांयःशब्दस्तद्विशिष्टा॥१०॥

नुन्नमना मधुना ना श्रयति मृतिं को विनां
गनामधुना ना ॥ इति ललना मधु नानाविध
मधयत् किल तदर्थना मधुनाना॥ ११ ॥

नुन्नेति अधुनावसंतसमये मधुनावसंतेननुन्नंप्रेरितंमनश्चित्तंयस्यसकः नापुरुषोयोऽगनांरमणींविनामृतिंमृत्युन्नाश्रयतिनप्राप्नोति अपितुसर्वोपिमृतिंआश्रयत्येव किलसत्येइतिहेतोर्ललनास्त्रीनानाविधंनानाप्रकारंमधुमद्यम् अधयत्अपिबत् कीदृशीललनातदर्थनांतस्यनायकस्यार्थनायाञ्चातांअधुनानाअनिराकुर्वाणाअंगीकुर्वाणेत्यर्थः रतिसमयेपुरुषः अस्माकंवशतामेष्यतीत्यानंदेनमधुअपाययदितिभावः यद्वा तन्मरणशंकयामधुअधरामृतंअपाययदितिभावः ॥ ११ ॥

पिकोपि कोपि को पिको वियोगिनी रभर्त्सयत् ॥
वचांसि भंग मालप न्नि तानि तानितानि ताः॥१२॥

पिकेति कोपिकःकोपोऽस्यास्तीतिकोपीकोप्येवकोपिकः सकोप इत्यर्थः यद्वा कोपयतीतिकोपिकस्तासामेवकोपकर्तेतियावत् अपि संभावनायांएतादृशः कोपिपिकः कोकिलस्तावियोगिनीरभर्त्सयत्भर्त्सितवान् भर्त्सनंत्वपकारगीरित्यमरः किंकुर्वन् भंगरचनाविशेषमितानिप्राप्तानि तानितानिवचांसिवसंतकालीनानिआलपत्कुर्वन् ॥ १२ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्री रापि कलापेन प्रवृद्ध माम्रावलीषु पिक लापेन ॥ न कलापिकलापेन प्रनर्त्तन मका रि वाग पिकला पे न ॥ १३॥

श्रीरापीति कलापेनकलाःपातीतिकलापश्चंद्रस्तेनश्रीःशोभाआपि प्राप्ता पिकलापेनपिकानांलापः संलापस्तेनआम्रावलिषुआम्रवृक्ष पंक्तिषुप्रवृद्धमतिवृद्धिंप्राप्तम् कलापिकलापेनकलापावर्हाएषांसंती तिकलापिनोमयूरास्तेषांकलापेनयूथेनप्रणर्तनंप्रकृष्टंनृत्यंनाकारीतिन किंतुकृतमवेत्यर्थः चपुनःकलापरिस्फुटावागप्यापप्राप्ता ॥ १३ ॥

सहकारवृते समये सहका रहणस्य के नस स्मार पदं ॥ सहकार मुपरि कांतैः सह का रमणी पुरः सकलवर्ण मपि ॥ १४ ॥

सहकारेति सहकारवृतेसहकारआम्रवृक्षस्तत्पुष्यमपिसहकारंतेनवृते समयेवसंतेकेपुरुषाः रहणस्यस्त्रीविरहजन्मदुःखस्यसहकाः सहनक्ष माःनकेपीत्यर्थः कारमणीस्त्रीकांतैःसहभर्त्तृभिःसहउपरिअंतसहकारं हकारवर्णसहितंपुरआदौसकलवर्णमपिकश्चलश्चकलौवर्णौताभ्यां सहितंपदंवाक्यंकलहमितियावत् नसस्मारनस्मृतवतीतथाचसर्वैव कलहंविस्मृत्यकांतसंगमंचकारेतिभावः ॥ १४

अधिगतकामधुरा गाद गमेत्य भ्रमरपटालिका मधु रागात् ॥ पीत्वो त्कामधुरा गा द्रुत मकृत ततः श्रि यो धिका मधु रागात् ॥ १५ ॥

अधीति रागात्प्रीतेःमधुपुष्परसंपीत्वाद्रुतंशीघ्रंउत्काउत्कंठितासती अधिगतकामधुराअधिगताप्राप्ताकामस्यधूर्भारोययासात्वयैतत्कर्तव्य मितिस्वीकृतमन्मथाज्ञासमुदायेतियावत् एवंभूताभ्रमरपटलिकामधु

CC-0. Digitized by eGangotri and MIDF- Delhi

पश्रेणिरगाद्वृक्षात् अगंवृक्षमेत्यप्राप्यमधुराःगाः वाणीरकृताकरोत्ततः भ्रमरमधुरगुंजितात् मधुर्वसंतोऽधिकाःश्रियःशोभाआगात्प्राप॥ १५॥

न समानसमानसमानसमागम माप समीक्ष्य वसंतनभः ॥ भ्रम दभ्रम दभ्रमदभ्रमदभ्रमरच्छ लतः खलु कामि जनः ॥ १६ ॥

नसमानेति खलुनिश्चयेकामिजनःकामुकसमूहःसमानसमानसमानसमागमंनआपमानसेमानोमानसमानस्तेनसहवर्तमानःसमानसमानः समानसमानश्चासौसमानः बंधुश्चमनोवर्तिमानसहितवधुरितियावत् तस्यसमागमंनप्रापेतिकाकुःप्रापैवेत्यर्थःयद्वासकामिजनःमानसेचित्तेयोमानः तेनसमानस्तुल्योयः समागमःतंखलुनिश्चितंनप्राप किंतुवसंतोद्दीपितःसन्अकालसमागमंप्रापेत्यर्थः किंकृत्वा वसंतनभःवसंतसंबंधिनभः आकाशंसमीक्ष्यदृष्ट्वा कीदृशंनभः अदभ्रमदभ्रमदभ्रमरच्छलतःभ्रमदभ्रम् अदभ्रंबहुलंमदोयेषांतेअदभ्रमदः मेघमालात्वेनस्वस्मिन्भ्रमंददतीतिभ्रमदाः अदभ्रमदाश्चतेभ्रमदाश्चतेभ्रमराश्चतेषांछलतोव्याजात् भ्रमंत्यभ्राणिमेघायत्रतत्अभ्रंमेघोवारिवाहःअदभ्रंबहुलंबहुइत्यमरः ॥ १६ ॥

गत मत्र च येन गृहाद समुत्तरतां त रतांतर तांतरतां ॥ पर एव विकार इयाय बृहत्तमसं तमसंतम संतमसं ॥ १७ ॥

गतमिति अत्रवसंतसमयेचपुनर्येनपुरुषेणगृहाद्गतंनिर्गतंपरः शत्रुःविकारोधातुविकारएवतंइयायप्राप कीदृशेन अंतःअतांतरतांतरतांअसमुत्तरताअंतः हृदिअतांतंअविस्तीर्णंयद्रतांतरंसुरतांतरंतस्यभावस्ततातांअसमुत्तरताअप्राप्तवतायद्वाअंतः हृदिअतांतंअसमाप्तंरतंयस्याः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साअतांतरताअंतर्मनसाअततिस्वामिनंगच्छतिसततंध्यायतीतियावत् साअंतरताअतांतरताचासौअंतरताचेतिसातांअसमुत्तरताउल्लंघयतात्यक्तवतातृष्णवनतरणयोरिति किंभूतंपुरुषम् बृहत्तमसंतमसं बृहत्तममधिकंसंतमसमज्ञानंयस्यतम् एवंअसतमविवेकिनं कीदृशःविकारः असन्अपरिहार्योऽसाधुर्वा ॥ १७ ॥

क्रुधि कां तवशं नवदाम समापन यापनया पनयाप नया ॥ त मृते ऽनुशयेन च ताम शनैर वतारवतारव तारवता ॥ १८ ॥

क्रुधीति यास्त्रीक्रुधिक्रोधेसतिनवदामसमापनयापनया नवंचतद्दाम चनवदामनवीनामालातस्याः समापनंसमाप्तिस्तयायायापनाकालातिक्रमस्तेनकरणेनकांतवशंनायकसमीपंनआपनप्राप यापनंकालविक्षेपेइतिहेमः कीदृशीया अपनयाअपगतोनयोनीतिर्यस्याःसा अरवतामूकत्वंअनुशयेनपश्चात्तापेन सहअशनैःशीघ्रंतंकांतंऋतेविनातांनायिकांआरप्राप कीदृशेनानुशयेन आसमंतात्अवतारवता अवतारोस्यास्तीत्यवतारवान् तेनतदानीमुत्पन्नेन बतखेदे ॥ १८ ॥

नभसो विवरं कुसुमेक्षणभाग तरो गतरो- गतरो गतरो ॥ वद कांत मवेक्ष्य यथा द्य मधा वर मे व रमेव रमे वर मे ॥ १९ ॥

नभसइति श्रितेतियुग्मं हेवरश्रेष्ठअगतरोहेपर्वतसंबंधिवृक्षत्वं नभसआकाशस्यविवरमंतरंअतरः तीर्णवानसिअत्युच्चोसीत्यर्थः कीदृशस्त्वम् कुसुमेक्षणभाक्कुसुमान्येवेक्षणानिनेत्राणितद्भाक्तद्युक्तः एवंगतरोगतरः अतिशयितोरोगोरोगतरः गतोरोगतरोयस्ययस्माद्वाहृदुःसहरोगरहितइत्यर्थः अतोमेकांतमवेक्ष्यदृष्ट्वातथावदकथयय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

थाअद्यमधौवसंतेअरमेवशीघ्रमेवरमेवलक्ष्मीरिवारमेक्रीडांकरोमिल धुक्षिप्रमरंद्रुतम् क्षीराब्धितनयारमेत्यमरः ॥ १९ ॥

श्रितेति गा मनागतस्वबंधुका मना ऽगतः ॥
परापनाम नागत स्तताम कामनागतः॥ २० ॥

श्रितेति पराउत्कृष्टानायिकाइत्यनेनप्रकारेणश्रिताआश्रितार्थाद्वृक्षमेव अतःअगतएतस्माद्वृक्षात्मनाकूईषदपिगांप्रत्युत्तरवचनंनआपनप्राप कीदृशी अनागतस्वबंधुकानआगतःस्वकीयोबंधुर्भर्त्तायस्याः सा नामनिश्चयेकामनागतःकामएवनागः कृष्णसर्प्पस्तस्मात्तातास्तांम्यतिस्म अनेनप्रलापोन्मादव्याधयइतितिस्रोदशाः सुचिताः ॥ २० ॥

का ललना दिवसं तं कुसुमशर मसोढ हृद्य
नादि वसंतं ॥ अलिभि रनादि वसंतं दृष्ट्वा
यत्रा त्मनो ऽर्थनादि वसं तं ॥ २१ ॥

केति काललनाकामिनीतन्दिवसंतास्मिंदिवसेवसंतऋतौकुसुमशरमसोढसहितवतीनकापीत्यर्थः दिवसमितिकालाध्वनोरत्यंतसंयोगेतिद्वितीयाकिंभूतंकुसुमशरंहृादिमानसे अनादिसर्वदावसंतंस्थितिमंतम् यत्रदिवससंतंवर्तमानंवसंतंऋतुंदृष्ट्वाअलिभिर्भ्रमरैरनादिनादोऽकारीत्यर्थः उत्प्रेक्षतेआत्मनोऽर्थनादिवआत्मियसुरतप्रार्थनादिवतथाच कीटाअपिसुरतंप्रार्थयंतिकिमुतमानुषीतिभावः ॥ २१ ॥

स्वय मथ मंदारितया युक्तो युक्तं नलः स
मंदारितया ॥ आरामं दारितया मदनेन
धिया पदुत्तमं दारितया ॥ २२ ॥

स्वयमिति अथानंतरं सनलःस्वयंमंदारितयायुक्तंमंदाराअस्यसंतीतिमंदारीमंदारिणोभावोमंदारितातयायुक्तंसहितंमंदारवृक्षसमूहसहि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तम् उत्तमंश्रेष्ठमारामसुपवनमापत्प्राप कीदृशोनलः मंदारितयायुक्तः मंदाअरयोऽस्यसंत्यसौमंदारीतस्यभावस्तत्तातयासहितः कर्त्तव्यविचारानभिज्ञशत्रुत्वसहितः यद्वामंदश्चासौअरिश्चेतिमंदारिः तस्यभावः मंदारितातयाहेतौतृतीयाशत्रुभावेनकामेनखंडितधियायुक्तइत्यर्थः एवंमदनेनस्मरेणदारितयाखंडितयाबुध्यायुक्तः एवंदारितयायुक्तः दाराः अस्यसंतीतिदारीदारिणोभावोदारितातया सहितः स्त्रीमित्तयासंयुक्तः ॥ २२ ॥

अनुव्रता समाननं समा ननंद भीमजा ॥
त मिंदुना समाननं समाननंदने वने ॥ २३ ॥

अनुव्रतेति समाननंमाननापूजातयासहितंपूज्यमित्यर्थः इंदुनासमाननंचंद्रसदृशमुखंतंनलंअनुव्रताअनुगताअनुबद्धावा समारुलक्ष्मीकाभीमजादमयंती समाननंदनेसमानंसदृशंनंदनंइंद्रवनंयस्य तस्मिन्वनेननंदआनंदंप्राप्तवती समाननंदेतिवाक्रियापदम् ॥ २३

इह रुचिरा मावलयस्व दृश मिति पृथक् प्रि
यस्य रामावलयः ॥ प्रापारामा वलयस्फुरो
गिरा ऽयदुदरे भिरामा वलयः ॥ २४ ॥

इहेति हेसुंदरिइहवनेरुचिरांमनोज्ञांदृशंचक्षुरावलयस्वआवर्तयइत्यनेनप्रकारेणप्रियस्यभर्तुर्गिरावचनेनताःरामावलयः स्त्रीश्रेणयःपृथक् एकैकशःप्रापारामाआरामगताअभूवंनरण्यंजग्मुरित्यर्थः कीदृश्यःवलयैःकटकैः स्फुरंतीतिक्विप्वलयस्फुरः कटकंवलयोऽस्त्रियामित्यमरः अथवाप्रियस्यवचनेनस्फुरस्तुष्टाबभूवुः कथंभूताःप्रापारामावलयःप्राप्ताआरामाणांआवलयोयाभिस्ताइत्यर्थःताःकाः यदुदरेयासामुदरेऽभिरामाःसुंदरावलयस्त्रिवलीभंगाइत्यर्थः करोपहारयोःपुंसिबलिः प्राण्यंगजेस्त्रियामित्यमरः ॥ २४ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवकुसुमानमनागा गंतुं नैछ त्परा समान
मनागाः ॥ अजनि पुमान मना गाश्रित्य स
सत्कुसुमदानमान मनागा ॥ २५ ॥

नवेति नवकुसुमानमनागाःनवैःकुसुमैरानमंतीतिनवकुसुमानमना स्ताद्दशाअगावृक्षायासुतागाःवनभुवःगंतुंयातुंपराऽन्यास्त्रीनैच्छन्नाया सीदिति कीदृशी समानमनाः समानंमानसहितंमनोयस्याःसा कृतमानेत्यर्थः सपुमांसापराधःपुरुषःअमनाक्अनल्पंसत् सुकुसुम दानमानंसुकुसुमानांदानमेवमानःसंमाननातामाश्रित्यअनागानि रपराधोऽजनिजातः सपुष्पवनंगंतुमनिच्छंत्यामानिन्याःस्वावाचित सत्पुष्पदानेनमानमपाचकार सत्कुसुमदामदानमितिपाठेपुष्पमाला दानमाश्रित्येत्यर्थः ॥ २५ ॥

त्रिभिःकुलकं रुषितं सखि साद ममुष्य लसत्त
नुतेतनुते तनु ते तनुते ॥ न न वाननवाननवान
नवा गिहते चरणे मृति मेष्यति सः ॥ २६ ॥

रुषितमिति नायकप्रेरितदूतीवाक्यं हेसखिलसंतनुतेतनुतेलसंती तनुर्यस्याअसौलसत्तनुस्तद्भावस्तत्तातयाइताप्राप्तानुतिस्तुतिर्ययासा तत्संबुद्धिः कमनीयशरीरताल्ब्धस्तुते तेतवतनुस्वल्पमपिरुषितंरो षोऽमुष्यःतवप्रियस्यसादमवसंन्नतांतनुतेविस्तारयति त्वयिरुष्टायाम स्यब्रहुदुःखंजायतइतिभावः सतवकांतःइहास्मिंन्वसंतेतेचरणेत्वत्प देऽनवाक्अवाक्अधोमुखः नअवाक्अनवाक्अभिमुखः अथवाअ वाक्मूकःअनवाक्स्तुतिवाक्यसहितःसंन्नित्यर्थः कथंभूतःवाननवा ननवान्वानंशुष्कंनवंयौवनोदयसुंदरमाननंमुखंयस्यसताद्दशः सप्रि यः मृतिंनएष्यतिइतिनाप्तिुमरिष्यत्येव त्वच्चरणपतितस्यास्यप्राणा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तिष्ठ... यथाशुष्कमुखस्यम...मवातमावं...मृ...थ
त्रनतिमितिपाठेनर्तिप्रणामंएष्यतीत्यर्थः स्तवःस्तोत्रंनुतिस्तुतिरित्य
मरः वानंशुष्केगतागंधइतिवैजयंती पराङ्मुखःपराचीनःस्यादवाङ
प्यधोमुखइत्यमरः इणगतावित्यस्यलृटिएष्यतीति ॥ २६ ॥

अपि चैत्यनगान वतानवता नवता नवता
स्ततरा मधुना ॥इह सौख्य मगोचर माचर
मा चरमा च रमा स्य न रम्यतरा ॥ २७ ॥

पुनस्तामेवाह अपीति हेसखिअवतानवता अवतानोविस्तारो
स्यास्तीत्यवतानवान् तेनमधुनावसंतेननवतानवीनतानअस्ततरा अति
शयेनत्याज्या बताश्चर्येकिंतुवसंतोनूतनतांत्यजिष्यत्येवेतिभावःकिं
कृत्वा नगान्वृक्षानेत्यप्राप्य इहप्रौढवसंतेऽगोचरंवक्तुमशक्यंसौख्यं
आचरलभस्वअस्यवसंतस्यचरमापश्चिमारमालक्ष्मीश्चपुनःमाशोभा
रम्यतरासुंदरीनभवति वसंतमध्येभर्त्रासहरत्यादिकंसुखमनुभूयतांप
श्चात्तनीशोभातुनभव्येतिभावः नुन्ननुत्तास्तनिष्ठ्यूताविद्धक्षिप्रेरिताःस
माः नवीनोनूतनोनवः आचरेतिचरगतिभक्षणयोरित्यस्यलोटि २७

इति लालिकया लिकया तकचै रतिका लिक-
या लिकया कथिता ॥दयितं समया स मया
ऽपरा व्यहर त्स मया समया च तया ॥२८॥

इतीति इत्यनेनप्रकारेणलालिकयालालयंत्याआलिकयासख्याक
थिताउक्ताअपरास्त्रीदयितंसमयाभर्तुःसमीपंसमयातूअगात् दयित
मिति समयायोगेसमयाअभितइत्यादिनाद्वितीया समयांतिकमध्य
योरित्यव्ययवर्गेमेदिनी समयादितियातेर्लङि चपुनःसकामुकः म
यालक्ष्म्यासमयातुल्ययातयास्त्रियासहव्यहराद्विचिक्रीड कीदृश्या
अलिकयातकचैरलिकेयाताप्राप्तायेकचाश्चूर्णकुंतलास्तैरतिकालिक

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

याश्यामलयासख्यावाविशेषणम् ललाटमलिकंगोधिःकचःकेशः शिरोरुहइत्यमरः ॥ २८ ॥

अतिरुचिमान स्तबकः सरस्तटो यं विचीय
मानस्तबकः ॥ इह खलु मान स्तबकः प्रि
या मिति परो नय त्समानस्तवकः ॥ २९ ॥

कश्चिन्मानवतींमानयंन्नाह अतीति हेसुंदरिअयंविचीयमानस्तबकोविभिःपक्षिभिर्भ्रमरप्रभृतिभिश्चीयमानामकरंदपानायान्विष्यमाणाःस्तबकापुष्पगुच्छायस्मिंस्ताद्दक् अथवाविचीयमानाअवचीयमानाःसमृद्धाःस्तबकायस्मिंताद्दक् अस्तबकः अस्तागतावकायस्मात्ताद्दक्सरस्तटस्तडागतीरम् अतिरुचिमान्अतिसुंदरः इहास्मिंस्थलेतवकःमानःखलुनिश्चितंकः प्रस्तावःइतिक्रमेणसमानस्तबकःसमानःमानसहितःसादरइतियावत्स्तवकः स्तुतिर्यस्यसताद्दक्कामुकः प्रियांस्त्रियंअनयदनैषीद्रत्यैइतियावत् पुष्पवासलोभभ्रमद्भ्रमरेवकादिराहित्येनानिर्जनेमानो ऽनुचितइत्येताद्दशान्यस्थलाभावादिहसंभोगोभवत्वितिहस्तेगृहीत्वाकुंजमविशदितिभावः अनयदिति नियोलङि ॥ २९ ॥

अरुणतरपरागस्य प्रसवं प्रैक्षिष्ट न पुन रप
रा गस्य ॥ हसितै रपरागस्य स्वै स्तिष्ठं
त्य पि लवेप्सु रपरा गस्य ॥ ३० ॥

अरुणेति अपरांन्यांगनाऽरुणतरपरागस्यअरुणतराः अतिशयेनारुणाः परागाः कुसुमरजांसियस्यताद्दशस्यास्यअगस्यवृक्षस्यस्वैः स्वकीयैर्हसितैर्हासैरपरागस्यअपगतलौहित्यस्यअपराक्संमुखंलवेप्सुःपुष्पमवाचिकीर्षुस्तिष्ठंत्यपिविद्यमानापिप्रसवंपुष्पंनपुनः प्रैक्षिष्ट

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नापश्यत्लोहितकुसुमस्यस्वहासेनशुक्ली भूतत्वाद्विस्मयोजातइतिभावः लवोऽभिलावोलवने स्यादुत्पादेफलेषुष्पेप्रसवोगर्भमोचने शैलवृक्षौनगावगौइत्यमरः ईक्षदर्शनांकनयोरित्यस्मात्प्रपूर्वाल्लुङ्याटिसिचीटिरूपंम् ॥ ३० ॥

अवेक्ष्य पल्लवालयान गां छ्रितालवालया ॥
लतातये व बालया बभे ऽन्यया ववाल या ॥३१

अवेक्ष्येति अन्ययाबालयाषोडशवार्षिक्यालतातयाइवलतात्वेनरूपेणवबभेशुशुभे अन्याका यापल्लवालयान्नवपत्रयुक्तान्अगान्वृक्षान्अवेक्ष्यदृष्ट्वाववालउल्ललासअन्यापिलताश्रितालवालाआश्रयभूतान्वृक्षांन्दृष्ट्वाउल्लसत्येवेतिभावः यद्वा ववालचचालेत्यर्थः यथालतावृक्षानधिरोहितुंचलतितथेतिभावः बलप्राणनेस्खलनेवाधातोः रूपं कथंभूतयाश्रितालवालयापल्लवानयनार्थंश्रितमाश्रितमालवालंययातयेत्यर्थः ॥ ३१ ॥

व्रततीना मालीनां मध्ये ऽन्यो ऽयाचिनुतां
गना मालीनां ॥ अप्ये ना मालीनां स्मिता
च्च जान न्मदा च्च ना सा लीनां ॥ ३२ ॥

व्रततीति अंन्यःकामिआलीनांसखीनांस्मिताद्धासात् चपुनरलीनांभ्रमराणामदाज्जानंन्नपिकलयंनपिअंगनांस्त्रियंन्याचिनुतविलोकयामास किंभूताम् व्रततीनांलतानांमध्येआलीनांसखीनांचमध्येआलीनांगुप्तांनामसंभावनायाम् आदौसर्वाएवलताइतिज्ञानमासीत्इदानींकाचित्हसतिकुत्रचित्भ्रमराः स्वनंतिइतिज्ञात्वातन्नांगनामन्वेष्टुंगतवानित्यर्थः ॥ ३२ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कमितुः कलुषाक्षिसुखार्थनभाग परा गपराऽ
गपरागपरा ॥ स्थितिं माप तथै व हृतः स
पुमान नया न न याननयाननया ॥ ३३ ॥

कमितुरिति अगपरागपरावृक्षमकरंददर्शनोन्मुखीअतएवकलुषा क्षिसुखार्थनभाक् कलुषंपरागेणयदक्षितस्य यत्सुखंपरागनिष्का सनात्तस्ययाऽर्थनायाञ्चातांभजतीतितद्भाक् अपरांगनाकमितुः क मयतीति कमिताभर्तातस्यापराक्संमुखंस्थितिंस्थानमापप्राप अन याअंगनयासपुमान्नृपतिस्तथैवतेनप्रकारेणभर्तुरभिमुखास्थितित्वेनन हृतइति नकिंतुवशीकृतः अनया कयाआननयाननयाआननंमुखं तस्ययानंभर्तृमुखसमीपप्रापणंतत्रनयोवैदग्ध्यंयस्याःसा नयनपतित मकरंदंदूरीकुर्वतिनायकाभिमुखंमुखंप्रसारयंतीतंजहारेतिभावः ३३

स्व मनेन समायतया व्याधिता गः स्वेव
कश्चन समायतया ॥ ऋजु मान समायतया
तस्मै ना क्रोधि जीवनसमाय तया ॥ ३४ ॥

स्वमिति कश्चनकामीतस्याः स्वभार्यायाःअग्रेआयतयाअतिदीर्घ यासमायतयामाययाकपटेनसहवर्तमानः समायस्तस्यभावः समाय तातयासकपटत्वेनआगः सुएवअपराधेषुसत्स्वपिस्वमात्मानमनेन समपराधरहितंव्याधितचक्रे ऋजुमानसंकोमलचित्तंआयतयाप्राप्तत याअर्थात्कामिन्याजीवनसमायप्राणतुल्याय तस्मैभर्त्रेनाक्रोधिनकु पितम् ॥ ३४ ॥

अभवदनेना ना विस्मयदो न्यो मानिनीजने
नानावि ॥ अतिसुजने नानाविस्खलनं यद्दु
पवन मनेना नावि ॥३५॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभवदिति मानिनीजनोविस्मयदोऽद्भुतदोअन्योऽपरोनापुरुषस्तत्त स्मात्धेतोरनेनाअनपराधोऽभवदभूत् यद्यस्मादनेनातिसुजनेनातिसु हृज्जनेनपुंसानानाविनानाविधावयः पक्षिणोयस्मिंस्तादृशमुपवनमा रामोऽनाविस्खलनंवर्णनाविपरीत्यमपशब्दादिवातद्रहितंयथास्यात्त थाऽनाविस्तुतम् कृतापराधः कश्चित्पुमानुद्यानवनर्णनयैवतांप्रासीद यदितिभावः अनावीतिणुस्तुतावित्यस्याचिणिलुङिरूपम् ॥ ३५ ॥

जनाद सोः समानतः पदाहतिं समानतः॥
परो दधौ समानतः स्वमूर्ध्नि भासमानतः॥ ३६

जनादिति परोऽन्यः कामुकः असोः समानतः असुः प्राणःत स्यसमानतः सदृशात् प्राणतुल्यात्समानतः साहंकारात् भासमान तः शोभमानात् जनात्कांताजनात् पदाहतिंचरणेनआहतिंआ घातंसमानतोऽतिनम्रस्सन्स्वमूर्ध्निदधौस्वशिरसिप्रसादमिवदधारे त्यर्थः ॥ ३६ ॥

तनुछटो त्तमालया तया भुवो त्तमालया ॥
अहारि शीतमालयानिलावधूतमालया॥ ३७॥

तनुच्छटेति तयाउद्यानभुवाउत्तमालयाउद्गताउच्छ्रितास्तमालवृक्षा यस्यांसातादृश्यापुनः शीतमालयानिलावधूतमालयाशीतोयोमाल योऽनिलोमलयगिरिसंभवोवायुस्तेनावधूताकंपितामालावृक्षश्रेणीय स्यांतादृश्याभुवाउत्तमालयाउत्तमआलयोगृहंयस्याः सातादृशीत नुच्छटास्त्रीसमूहोऽहारिहृतातथाचमंदसुगंधिशीतलवायुसंबंधेनमनो हरेउद्यानेकांतसहितासर्वाविलासिन्यउत्तमगृहंत्यक्त्वारमणार्थंययुरि तिभावः वेल्लितप्रेंखिताधूतचलिताकंपिताधुतेइत्यमरः छटा कांतौ संहतौचेतिधरणिरितिभरतः ॥ ३७ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रितलसदारामाभिः प्राप्या ति जनो विहृति
मुदारा माभिः॥ आरा दारा मा भिः स्फुरितसरो
जं सर स्तदा रामाभिः ॥३८॥

श्रितेति जनःकामुकः श्रितलसदारामाभिः श्रितआश्रितोलसन्दैदीप्यमानआरामोयाभिस्तादृशीभिः आभिरमूभीरामाभिः स्त्रीभिः अमासहउदारांश्रेष्ठांविहृर्तिविहारंइत्यनेनप्रकारेणप्राप्यतदातदानीं आरात्समीपेऽभिस्फुरितसरोजंअभिसर्वतः स्फुरितानिफुल्लानिसरोजानिपद्मानियस्मिंस्तादृशंसरस्तडागंआरप्राप्तवान् आमासहसमीपेच कासारःसरसीसरइत्यमरः ॥ ३८॥

कि मपः सरसी मा या धाम गुणामृतप्रस
रसीमायाः॥ द्रुत मिति स रसी मायात्यक्तो भै
म्यानल श्च सरसी मायात् ॥ ३९ ॥

किमपइति हेंदमयंतित्वमिमाअपःजलानिकिंगच्छसिविहर्तुमिति शेषः यात्वंगुणामृतप्रसरसीमायाधामगुणाएवामृतंतस्यप्रसरोविसर्पणंप्रवाहआधिक्यंवातस्ययासीमामर्यादातस्याधामगृहम् अत्रअमृतशब्देनसुधाजलंचाभिधीयतेगुणामृतप्रवाहःत्वय्येवस्थितइतिभावः इत्येवमुक्त्वासनलोरसीरसीकः मायात्यक्तोव्याजहीनोऽदंभीभैम्यासहद्रुतंशीघ्रंसरसींसरोऽगादगमाद्विहर्तुमितिशेषः आपःस्त्रीभूम्निवार्वारि त्यक्तंहीनंविधुतंसमुज्झितंधूतमुत्सृष्टमित्यमरःआगादितियातेर्लङि ३९

गतपंकाः सारस्य श्रियो स्य जह्रु र्मनो ऽधिकाः
सारस्यः॥ अपि केकाः सारस्यस्थिताः कुरर्य
श्च हंसिकाः सारस्य ः॥ ४०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गतेति सारस्यः सरसइमाःसारस्यःसरःसंबंधिन्यः श्रियःशोभाःकथंभूताः गतश्च्युतः पंकोयाभ्यस्तादृश्यःनिर्मलाःअधीकाःश्रेष्ठाः यद्वा कानिजलानिअधिकृत्यवर्ततेताः सारस्यसारभूतस्यश्रेष्ठस्यास्यनलस्यमनोहृदयं जहुर्हृतवत्यः सारस्यास्थिताः आरस्यतइत्यारसःशब्दस्तस्यभावआरस्यंआरस्येनसहितंसारस्यंतत्रस्थिताः कृतमधुरध्वनयः अथवासरसस्यभावः सारस्यंतत्रस्थिताविख्याताः सारस्याज्जलसाहित्याद्वास्थिताः कोकाश्चक्रवाकाः कुर्यः कुररपाक्षिस्त्रियः हंसिकाहंसस्त्रियः सारस्यःसारसानांस्त्रियोऽपिमनोजहुः सरःसंबंधिशोभादर्शनेनकोकादिदर्शनेनचमुमुदइतितात्पर्यं पंकोस्त्रीशादकर्दमौसारोबलेस्थिरांशेच कोकश्चक्रश्चक्रवाकइत्यमरः जहुरितिहृञोलिटि॥४०

का क्षतिर स्ति मिताभिः स्फुट मङ्गि र्विहृति
रस्ति मिताभिः॥ अनतितरास्तिमिताभिः क
मेत्य यद शंकि धृतिभि रस्ति मिताभिः॥ ४१

काक्षतीति अनतितरस्तिमिअत्यंततरोबलंरंहोवायेषांतेऽतितरसोनविद्यंतेअतितरसास्तिमयोमत्स्यविशेषायस्मिंतादृशंतिमिनक्रादिरहितंकंजलमेत्यप्राप्यधृतिभिर्धैर्यैरस्तिंत्यागामिताभिरत्यक्तधैर्याभिः यद्वा धैर्यैः अस्तिमिताभिःअस्थगिताभिःचंचलाभिरित्यर्थः ताभिस्त्रीभिःअशंकिशंकितम् अतर्कीतिपाठेविचारितंकिमतर्कितदाहयत् यस्मात् अस्तिंक्षेपणंइताभिःप्राप्ताभिःतरंगक्षिप्ताभिरित्यर्थः मिताभिर्लघुपरिमाणाभिरङ्गैःस्फुटंप्रत्यक्षमियंविहृतिःक्रीडाअतः काक्षतिरस्तिनकापीत्यर्थः तिमिनक्रादिरहितेसरसितासांभयकारणंस्वभावभीरुत्वमेव राजीवःशकुलस्तिमिः तरसीबलरंहसी कंशिरोंबुनोरित्यमरः शकिभयेइत्यस्याचिणिलुङि॥ ४१ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अलि र्मिलत्परागतः सरोरुहा त्परागतः॥ मुखं मुदा ऽपराग त स्तदीयमाप रागतः ॥ ४२ ॥

अलीति अलिर्भ्रमरोमिलत्परागतोमिलन्नुल्लसन्परागः कुसुमरेणुर्य स्मिंस्तादृशादतः अस्मात्सरोरुहात्कमलात्परागतः परावृत्तःअपरा क्संमुखंतदीयंस्त्रीगणसंबंधिमुखंमुदाहर्षेणरागतोऽनुरागादापप्राप्त वान् सौरभाधिक्येनकमलंविहायतन्मुखमशिश्रियादितिभावः ४२

अथ कामानलिनीनां स्त्रीणां संघै र्मनोरमा नलिनीनां ॥ विधुततमा नलिनीनां पंक्ति र्विततानसंभ्रमा न लिनीनां ॥ ४३ ॥

अथेति अथानंतरंकामानलिनीनांकंदर्पानलयुक्तानांकामुकीनांनली नीनांनलयुक्तानांनलः पतित्वेनअस्यास्तीतिनलशब्दादिनिप्रत्ययः ततोङीप्स्त्रीणांसंघैः रूमूहैः नलिनीनांकमलिनीनांपंक्तिः विधुततमा ऽत्यंतंकंपितास्नानवशात्पद्मावचयाद्वामनोरमासुंदरीअलिनीनांभ्रमरी णांसंभ्रमांभयध्वनींस्ततानतनलसहितारामांदोलिताकमलिनीभृंगीझं कारानतनोदितिभावः ॥ ४३ ॥

सरः श्रियों तरं गतः सरोजनृत्तरंगतः॥ भयं महत्तरं गत स्तनूजन स्तरंगतः ॥ ४४ ॥

सरइति सरःश्रियःसरोलक्ष्म्याअंतरंमध्यंस्वरूपत्वंवागतः प्राप्तःस्त नूजनः स्त्रीसमूहःसरोजनृत्तरंगतःसरोजानांकमलानांनृत्तंनर्तनंतस्यरं गतोरंगभूमेः तरंगतःउर्मेर्महत्तरंअतिशयेनमहद्भयंसाध्वसंगतोगत वान् कमलनर्तनहेतुतरंगान्नक्रहातिकंपशंकयास्त्रीजनोभीताबभूवे तिभावःअंतरमवकाशावधिपरिधानांतर्धिभेदतादर्थ्ये छिद्रात्मीयवि नाबहिरवसरमध्येंतरात्मनिचेति लास्यंनृत्तंचनर्त्तनेइत्यमरः ॥४४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ नीरा त्सरसतः फेनपरीता द्यथां बरा
त्सारसतः ॥ अतिमुखरा त्सारसत स्तीरमिता
स्त्रीतति श्चिरा त्सारसतः ॥ ४५ ॥

अथेति अथजलविहारानंतरंसास्त्रीततिःस्त्रीसमूहश्चिराद्दहुक्षणात्सारसतः सरसःइदंसारसंतादृशान्नीराज्जलातडागजलात्सारसतःसरसःइदंसारसंक्रीडनंततस्तद्विहाय ल्यब्लोपेपंचमी नीरात्कथंभूतात्रसतःसारतःअतिमुखरात्रसतः शब्दायमानात् सारसतःसारसपक्षिविशेषाद्धेतोः अतिमुखरादतिवाचालात् फेनपरीतात् फेनव्याप्तात्तीरंतटं इताप्राप्ता उत्प्रेक्षतेअंबरात्आकाशात्यथाअंबरादिवेत्यर्थः इवार्थेयथाआकाशपक्षेसारसतः साराणिश्रेष्ठानिसंतिनक्षत्राणियस्मिंस्तादृशात् फेनपरितंजलंनक्षत्रवदाकाशप्रायंयथागगनतलादप्सरसोवतरंतिएवंजलात्स्त्रियोऽवतेरुरितिभावः सत्येसाधौविद्यमानेप्रशस्तेभ्यर्हितेपिसत् व्योमपुष्करमंबरम् सारोबलेस्थिरांशेचइत्यमरः रसतइतिरसशब्देइत्यस्मात्शत्रंतः ॥ ४५ ॥

स चो दयावलीनतः समुत्प्रभावली नतः ॥
नय न्यया वलीनतः पदं जनो वलीनतः ॥४६॥

सचोदयेति सचजनःस्त्रीसमूहः वलीनतस्त्रीवलीभिरानतः नम्रःअलीन्भ्रमरान्नयन्गात्रादिसौगंध्येनाकर्षयन्अतः सरस्तीरात्पदंस्वस्थानंययौ कथंभूतंपदंउदयावलीनतःउदयाचलप्राप्तात् यद्वाउदयंप्राप्यअवलीनात्निमग्नात्इनतः सूर्यात्समुत्प्रभावलिसंम्यगुद्गताःप्रभावलयः प्रभाश्रेणयोयस्मिंस्तादृशंसूर्येऽस्तमुपयातिस्त्रीजनोगृहंगतवानित्यर्थः पदंव्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः ४६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिश कामा नंगे हंमन्यो मदनेषुविकृतिमा
नंगे ऽहं ॥ इति परमानंगेहं नलः प्रियामनय
दतिविमानं गेहं ॥ ४७ ॥

दिशेति हेअंगप्रियेदमयंतिअहंअंगेशरीरेमदनेषुविकृतिमान् काम शरविकारवानस्मि कथंभूतः इहंमन्यः इंकामंहंतीतिइहःइहंकाम हंतारमात्मानंमन्यतेइहंमन्यःअतः कामानभिलाषांदिशदेहिरत्यभि लाषंपूरय इत्यनेनप्रकारेणनलः प्रियांगेहंगृहंअनयत्अनैषीत्कथंभू तंगेहंपरमानंगेहंपरमाउत्कृष्टाऽनंगस्यकंदर्पस्यइहाचेष्टावांछावाय स्मिन्भित्तिलिखितनानाकामचेष्टंकामोद्दीपनंवाअतिविमानंअति क्रांतंविमानंपुष्पकादियेनतत् तिरस्कृतंदेवयानमित्यर्थः अनयादिति णीञ्प्रापणेलङि ॥ ४७ ॥

अरुणमहस्ते नेन प्रापि च सो ऽब्जै र्गुणग्रह
स्तेने न ॥ भाव्य मिह स्तेनेन स्फुट मस्य
हि तद्गतें ऽशुहस्ते ऽनेन ॥ ४८ ॥

अरुणेति इनेनरविणाअरुणमहस्ताअरुणतेजस्त्वंप्रापिप्राप्तासंध्या रागारुणोरविरभूत्सचगुणग्रहोगुणग्रहणंअब्जैः कमलैर्नतेनेनविस्ता रितः इहसंध्यासमयेअस्यहिसूर्य्यस्यतद्गतेकमलगतेअंशुहस्तेकिर णहस्तेसति अनेनरविणास्तेनेनचौरेणस्फुटंव्यक्तंभाव्यंसंध्यारागा रुणेसूर्य्येकमलानामारुण्यंनाभूत् यतःकमलगतेरविकरेसतिसायंका लेस्वकराद्वारातद्रक्ततांरविरपहरिष्यतीतिभावः महश्चोद्भवतेजसोरि ति तेनेतनोतेर्लिटि ॥ ४८ ॥

यतो यतो यतो यतो रवे र्मरीचिसंचयः ॥
महांधकारसंचय स्ततस्ततस्ततस्ततः ॥४९॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यतइति यतोयस्माद्धेतोरवेर्मरीचिसंचयोरविकिरणसमूहोयतोयतोय स्माद्यस्मात्स्थानात्‌यतः उपरतः यमुउपरमेधातोःरूपम्‌ ततस्तस्मा द्धेतोस्ततस्ततस्तत्रतत्रमहांधकारसंचयोमहांधकारसमूहस्ततःव्याप्तः यतोयतोदेशाद्रविकिरणानिवृत्ताः स्तत्रतत्रमहांधकारोव्यापादिति भावः ॥ ४९ ॥

छादितरविता नेन प्रापि च कालेन सस्वर वितानेन॥ जितरुधिरवितानेन व्योम्ना च स्फुरि त मुडुभि रवितानेन ॥ ५० ॥

छादितेति अनेनकालेनसायंकालेनछादितरविताआच्छादितः पिहि तोरविर्यस्मिंसः तस्यभावस्तत्तासाप्रापिप्राप्ता कथंभूतेनसस्वरविता नेनसस्वराःसशब्दाः वीनांपक्षिणांतानाविस्तारायस्मिंस्ताहशेनस शब्दपक्षिसमूहविशिष्टेनेत्यर्थः एवंजितरुधिरवितानेनजितरुधिरस मूहेनात्यंतमारक्तेनेत्यर्थः एवमवितानेनअविनांमेषाणांवितानोवि स्तारोयस्मिंस्तेन यद्वा नविद्यतेवितानोयज्ञोयस्मिंस्तेन संध्यायांस र्वं वर्जयेदितिस्मृतेः चपुनर्व्योम्नाआकाशेन उडुभिः करणेनस्फुरितं शोभितम्‌ यद्वाजितरुचिरवितानेनेतिपाठेव्योम्नाइत्यस्याविशेषणं जितः अतिरुचिरोवितानउचोयेनइत्यर्थः क्रतुविस्तारयोरस्त्रीविता नंत्रिषुतुच्छके तारकाप्युडुवास्त्रियामित्यमरः ॥ ५० ॥

अथो द्यतो ऽबुराजतः श्रियं ख माप राजतः ॥ यथा घटो व्यराजत स्मराग्रगः स राजतः ॥ ५१॥

अथेति अथानंतरमंबुराजतउदधेः सकाशात्‌उद्यतउद्गतः सचंद्रोव्य राजतशुशुभे खमाकाशंराजतश्चंद्रात्‌श्रियमापप्राप यथास्मराग्रगः कामपुरोवर्तीराजतोरूप्यमयोघटः शोभते यथाशब्दइवार्थे उदधे रुत्थितश्चंद्रोमदनभूपप्रस्थानाभिषेकरूप्यकलशइवरराजेतितात्पर्यम्‌ श्वेतरूप्येपिरजतंहेम्निरूप्येसितेत्रिषु व्यराजतेतिराजतेर्लङि ॥ ५१॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दधतं कालंकालं कालं का लं वियोगिनी
शशिनं तं॥ अध्वगकालं कालं कालं कालं
प्रसमीक्षितुं प्रोद्यंतं ॥ ५२ ॥

दधतमिति काषियोगिनीविरहिरणीतंशशिनंसमीक्षितुंद्रष्टुमलंसम र्थानकापीत्यर्थः कथंभूतंकालंकृष्णवर्णयतूकालंकालंकालंकलं कएवकालंकः सचासौअलंकालोऽलंकारोरलयोरैक्याद्यमकेनदोषः तंदधतंधारयंतंम् अध्वगकालंअध्वगानांपथिकानांकालंनाशकम् एवंकालंकालंकालेकालेरात्रौरात्रौप्रोद्यंतंप्रकर्षेणोद्यंतं कृष्णेनीलासि तश्यामकालश्यामलमेचकाः कालंकालमतिनित्यवीप्सयोरितिद्विर्व चनम् कालाध्वनोरत्यंतसंयोगेइतिद्वितीया ॥ ५२ ॥

क्षरत्तुषारशीकरा प्रबुद्धकैरवाकराः॥
ततो जजृंभिरे कराः जगत्सु शार्वरीकराः ॥ ५३ ॥

क्षरदिति ततोनंतरंक्षरत्तुषारशीकराःक्षरंतः स्रवंतस्तुषारशकिरास्तुहि नजलकणायेभ्यस्तादृशाः एवंप्रबुद्धउत्फुल्लःकैरवाकरः कुमुदसमूहो येभ्यस्तादृशाः शार्वरीकराश्चंद्रसंबंधिनः शर्वरीकरश्चंद्रः तस्येदमि त्यण् कराःकिरणाजगत्सुलोकेषुजजृंभिरेविजृंभिताः वलिभागांश वःकराः जजृंभिरेइतिजृंभिविनामेविकाशेचेत्यस्माल्लिट् ॥५३ ॥

वधू स्तदा ऽनुनिन्यिरे नयेन येन येन ये ॥
वशं नरो ऽनय न्समुन्नतेन तेन तेन ते ॥ ५४ ॥

वध्विति तदाचंद्ररश्मिपातानंतरंयेनरः येपुरुषाः येनयेननयेनयया ययानीत्याउपायेनवधूः कामिनीरनुनिन्यिरेऽनुनीतवंतः तेपुरुषास मुन्नतेनसमृद्धेनतेनतेनोपायेनवशंस्वाधीनतामनयन्नेषुः येनयेनोपा येनपादानत्साक्विसोऽवशावशमागताः तेनैववशंचक्रुरितिभावः॥५४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहासहाव मादरैः सहासहास्मरस्य ते ॥ सु
शसुरा यथा मृते सुरासु राग मादधुः ॥ ५५ ॥

सहेति स्मरस्यकामस्यअसहाअसहिष्णवस्तेकामुकजनाः सहसहा वंहासहावादिभावसहितंयथास्यादेवंआदरैः सहसादरंसुरासुमधु षुरागंपानानुरागमादधुर्दधिरे अनंतरंकामुकजनाहावादिसहितंसुरां पपुरितिभावः यथासुरासुरादेवासुराअमृतेरागंकुर्वंतिसुराहलिप्रिया हालापरिस्रुद्वरुणात्मजा आदधुरितिदधातेर्लिटि यच्चोक्तंभरतेन अलं कारस्वभावज्ञैर्ज्ञेयाभावारसाश्रयाः यौवनेभ्यधिकाःस्त्रीणांविकारा वक्त्रगात्रजाः देहात्मकंभवेत्सत्वंसत्वाद्भावःसमुत्थितः भावात्समु त्थितोहावोहावाद्धेलासमुत्थिता लीलाविलासोविच्छित्तिर्विभ्रमः किलकिंचितम् मोट्टायितंकुट्टमितंविव्वोकोललितंतथाविकृतंचेतिवि ज्ञेयादशस्त्रीणांस्वभावजाः प्रियस्यानुकृतिर्लीलाश्लिष्टावाग्वेषचे ष्टितैः॥ विलासोतिविशेषोस्तिप्रियायावासनादिषु ॥ मंडनाच्छादन न्यासोविच्छित्तीरूपदर्शतः॥ चित्तवृत्त्यनवस्थानंशृंगाराद्विभ्रमोमतः ह र्षाल्हादितगीतादिव्यामिश्रंकिलकिंचितम् मोट्टायितंप्रियंस्मृत्वासां गभंगादिजृंभणम्॥ दुःखोपचारःसौख्येपिहर्षात्कुट्टमितंमतम् ॥ वि ब्बोकोभिमतप्राप्तावपिगर्वादनादरः ॥ अनाचार्योपदिष्टंस्याल्ललितंरति चेष्टितम् ॥ वक्तव्यभाषणंव्याजाद्विकृतंदर्शितेंगितम् ॥ ५५ ॥

मधु प्रपीय चा भव न्नतानता नता नताः ॥
रमाऽरमा रमारमाकु जने त्र हालया ॥ ५६ ॥

मध्विति मधुप्रपीयमधुमद्यंप्रपीयपीत्वातास्ताः स्त्रियःनतानम्राअन ताअनम्राश्चनाभवन्नपित्वभवन् यायाः पूर्वंनम्रास्तास्तामधुपाने कृतेऽनम्राअभवन् यायाअनम्रास्तास्तामधुपानेकृतेनम्राअभवन् ।रमाकुलेमारः कंदर्पस्तस्यमालक्ष्मीःकंदर्पशोभातयाआकुलेऽत्रज

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेहालयासुरयाकरणेनरमाश्रीःअरंशीघ्रमेवआरप्राप्तवती सुरापाना स्त्विजनेऽन्यैवकाचनशोभाभूदितितात्पर्यम् प्रपीयेति पीङ्पानेस्यरू पंपिबतेस्तुप्रपायेतिभवितव्यम् अभवंन्निति भवतेर्लङि आरेतिअर्ते र्लिटि मधुमद्येमधुक्षौद्रेमधुपुष्परसेविदुः यद्वा पूर्वश्लोकोक्तास्तेका मिजनाः चपुनः मधुआसवंप्रपीयपीत्वाअतानतानतानताः अभवन् अतानंअक्षरशून्यंयतानंगानमूर्च्छनाविशेषः तस्यभावस्तत्तातस्यांआ नताः परायणाः सुरांपीत्वागानोत्सुकाअभवंन्नित्यर्थः अत्रवसंतेज नेकामिजनेअथवाअत्रजनेअस्मिन्कामिजनेहालयामदिरयाआकु लेमत्तेसतिरमाशोभामारंकामंअरंअत्यर्थंआरप्राप मदिरापानेनका मोविजृंभितइत्यर्थः ॥ ५६ ॥

भ्रमरै द्रागि स्तानि पत्रीय च मधूनि सानुराग
स्तानि ॥ दत्तनिरागस्तानि प्राप च्छयनं जन
स्त्वराग स्तानि ॥ ५७ ॥

भ्रमरैरिति सानुरागः सस्नेहः एवंत्वरागः त्वरयावेगेनगच्छतीति त्वरागःजनः कामुकलोकोदत्तनिरागस्तानिरपराधतायैस्तादृशानिवि स्मारितापराधानि भ्रमरैर्भृंगैश्चषकोपरिस्थितैर्द्राक्झटित्यस्तानि त्यक्तानिमधूनिमद्यानिप्रपीयपीत्वाशयनंपर्यंकंचप्रापत्अशिश्रियत् कीदृशंशयनम् तानितानोविस्तारोवितानोवास्यास्तीतितानि सुरता र्थमितिभावः ॥ ५७ ॥

अदूरवस्थितैःप्रियैः सुदूरवस्त्रकाः कृताः ॥
तदूरव श्चकाशिरे मृदूरवः क्षतानखैः ॥ ५८ ॥

अदूरेति अदूरवस्थितैरदूरेनिकटेवस्थितैः प्रियैर्भर्तृभिः सुदूरवस्त्रकाः कृताःसुदूरेवस्त्रंयेषांतास्तादृशाः कृताविहिताः तदूरवस्तासांस्त्रीणाम्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रव॰ ऊरुदेशाःमृदूरवमृदवःकोमलाश्चतेउरवोविपुलाः पीनाश्चकोम लाविपुलाः नखैःक्षताभिन्नाश्चकाशिरेशुशुभिरेसुरतसमयेप्रियकरहृत वसनाः कोमलाःस्त्रीणामूरवोरेजुरितिभावः वस्थितेरिति वष्टिर लोपेत्यादिनाऽल्लोपःबहुव्रीहित्वात्कः सक्थिक्लीबेपुमानूरुः कोम लंमृदुलंमृदु बाल्होरुविपुलंपीनमित्यमरः चकाशिरेइतिकासृदी प्ताविस्यस्यलिटिरूपं ॥ ५८ ॥

ससमुद्रमहेलाभिः स्फुरितगुणाभि स्ततः स्मर
महे लाभि ॥ श्रीः प्रबलमहेलाभि स्तथै व यु
वपंक्तिभिः परमहेलाभिः ॥ ५९ ॥

ससेति ततोनंतरंससमुद्रमहेलाभिः स्फुरितगुणाभिः ससमुद्रास सागरामहतीदीर्घायाइला भूमिस्तस्यांआभिस्फुरिताः श्रुतागुणाया सांताभिः परमहेलाभिःपरमाउत्कृष्टाहेलालीलायासांताभिः प्रबलम हेलाभिः प्रचुरस्त्रीभिः स्मरमहेकंदर्पोत्सवेश्रीःशोभासुखंवाअ लाभिप्राप्ता तथैवतेनप्रकारेणयुवपंक्तिभिः तरुणश्रेणीभिः श्रीः प्राप्ता यद्वा ताभिः करणेनसहवायुवपंक्तिभिःशोभाप्राप्ता उभयत्रापि विशेषणं अलाभीति डुलभष्प्राप्तावित्यस्यलुङिचिण् भावकर्मणो रितिच्लेश्चिणिकृतेलभेश्चेतिनित्यंनुमिप्रसक्तेविभाषाचिस्मुलोरिति नुमागमाभावेवृद्धौरूपम् महतीइलामहेलागोभूवाचास्त्विडाइलाः महेलामहिलापिचेतिद्विरूपकोशः ॥ ५९ ॥

इह मणितारावलयश्रित इव नृत्ये कृता
वतारा वलयः ॥ वक्षसि तारावलयस्वना
निपेतु श्च हारतारावलयः ॥ ६० ॥

विपरीतरतिंवर्णयन्नाह इहेति मणितारावलयश्रितेमणितेसुरतकू जितेआरवःक्षब्दःतस्यलयःसाम्यंतेनश्रितेगीतवाद्यादिसाम्ययुक्तेइहर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेनृत्येइवनाट्यइवबलयःत्रिवलीभंगाकृतावताराः कृतोवतारोवत रणंयाभिस्तादृश्योऽभवन् उपरिसुरतेऽत्यासक्त्यावलयोनादृश्यंतेति यावत् वलयस्वनाः कंकणझणझणत्काराश्चताराअत्युच्चाअभवनूहा रताराबलयः हारस्यताराःशुध्दमौक्तिकानितेषांश्रेणयश्चप्रियवक्षसिनि पेतुश्चस्खलुरित्यर्थः यद्वा हारेषुयस्ताराबलिर्यष्टिविशेषः तेवक्षसिप्रि योरसिनिपेतुःरतिसंभ्रमात् त्रुटितहारयष्टयः प्रियोरसिनिपतिताइत्य र्थः सप्तविंशतिमौक्तिकायष्टिस्तारावलिर्नक्षत्रमालासैवनक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैरित्यमरादित्यर्थः नृत्येपिपात्राणामवतरणं तद्धारादित्रुटनंकंकणक्काणादिभवता लयःसाम्यमथास्त्रियाम् मणितंर तिकूजितम् वलिःप्राण्यंगजेस्त्रियामित्यमरः अभवन्निति भवतेर्लिङि तारोत्युच्चैस्त्रयस्त्रिषु कटकंवलयोस्त्रियाम् मुक्ताशुद्धौचहारःस्यात् निपेतुरितिपततेर्लिटि ॥ ६० ॥

तया र्द्रधी रमाययया मुदा मनारमा यया ॥ नलो
विहार मायया वधः कृता रमा यया ॥ ६१ ॥

तयेति आर्द्रधीःशृंगारस्निग्धबुद्धिर्नलोमुदांहर्षाणांअनारमाययाआर मोविरतिस्तद्रहितः अनारमःअयःशुभावहविधिर्यस्यास्तादृश्याहर्षा विरतभाग्ययेत्यर्थः अमाययामायारहितयातयामदमयंत्यासहितोन लोविहारंक्रीडामाययौआगमत् यद्वा यादमयंतीमुदांहर्षाणांअनार मायअविश्रामायभवति तयासहनलोविहारमाययौ ययारमाल क्ष्मीरधःकृतारूपेणसौभाग्येनवालक्ष्मीतोप्यधिका तादृश्यादमयंत्यान लोविजहारेतिभावः आययावितियातेर्लिटि ॥ ६१ ॥

सा ऽशंका ऽमाया ऽसीत्कृति भैमी न लस्य
कामाया सीत् ॥ कामनिकामायासी द्युतिं
तदिष्टां स चा धिका मायासीत् ॥ ६२ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साशंकेति साभैमीअशंकाशंकारहिताकृतीतिनिपुणापुण्यवतीवाऽमायानिर्व्याजाआसीदभूदित्थमनेनप्रकारेणनलस्यकामाय अभिलाषाय आसीदुज्जगाम नलकाममपुपूरदित्यर्थः कामनिकामायासीत्कामिनमन्मथेननिकाममत्यर्थमायासीआयासः परिश्रमोयस्यताहृक् सचनलश्चतादिष्टांदमयंतीऽपिता मधिकांद्युतिंक्रीडांआयासीत् आगतः दमयंतीरतावसरेनिर्व्याजाशंकानलस्याभिलाषायबभूव नलश्चदमयंतीमनोऽभिलषितं समपूरयदितिपरस्पररसोत्कर्षोभूदिति भावः आसीदित्यस्तेरेकंलाङि अपरमपिअसगतावित्यस्यलुङि आयासीदितियातेर्लुङि यद्वा भैमीकथंभूतासाशंकासभयाप्रौढरात्रित्वात् स्त्रीस्वभावत्वाच्चपुनः अमायानिः कपटापुनः सीत्कृतिनी सीत्कारवती यद्वा साशंकामायासीत्कृतिनीत्येकंविशेषणंआशंकासहितायामायाकापटचंतयासीत्कृतिनीभच्छलेनसीत्कारवती यद्वा माययाच्छलेनसीत्कृतिनीनलस्यकामायमनोरथसिद्ध्यैआसीत्बभूवेत्यर्थः ॥ ६२ ॥

इति नानामायानां नलः कलिभुवां बलेन
नानामायानां ॥ व्यसनाना मायानां नि
धिररम द्राज्यजन्मना मायानां ॥ ६३ ॥

इतिती इत्यनेनप्रकारेणनलोनैषधः नानामायानांनानाविधामायाव्याजानियेषुताहृशानांकलिभुवांकलेर्भवंतीतिकलिभुवः कलिजनितास्तेषां व्यसनानांविपदांआयानादागमनपर्यंतं आगमनावधेः अरमत् अक्रीडत् कथंभूतः बलेनकरणेनराज्यजन्मनांराज्येजनपदे जन्मयेषांताहृशानांमायानांधनागमनानांनिधिर्निधानमाधारइतियावत् अभयादितिपाठेनानादंभकालिजनितापत्यागमनावधिनलोराज्यश्रीभाजनमभूदितिभावः अयःशुभावहोविधिः अभवदितिभवतेर्लिङि ॥ ६३ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वयंवरा दनंतरं मही मही मही नधीः ॥
ररक्ष नैषध स्तदा रराज राजराजराः॥ ६४ ॥

इति कालिदास कृतेनलोदयसत्काव्ये
द्वितीयोच्छ्वासः॥ २ ॥

स्वयमिति तदातस्मिन्कालेनैषधोनलः स्वयंवरादनंतरं स्वयंवरा त्परतः मही भुवंररक्षापालयत् कीदृशः महीसोत्सवः पुनः अही नधीः बिशालबुद्धिः राजराजराः राजराजः कुबेरस्तस्येवराधनंय स्यतादृशः सनूरराजशुशुभे स्वयंवरोत्तरंभुवमरक्षन्नलः कुवेरप्राय संपश्चासीदितिभावः राजराजोधनाधिपः अर्थरैविभवाअपीत्यमरः रराजेतिराजतेर्लिटि ॥ ६४ ॥

इतिश्रीनलोदयकाव्यटीकायांसुबोधिन्यांद्वितीयोच्छ्वासः ॥ २ ॥

॥ इतिपूर्वार्धः ॥

अथ सुरवृषभा स्व रतः प्रेक्ष्य कलिं प्रस्थिता
महाद्भा स्वरतः ॥ यः कृतिषु शुभा स्वरतः
पप्रच्छु स्तद्गति धनंनिभाः स्वरतः ॥ १ ॥

अथेति अथस्वयंवरादनंतरंअतोस्माद्भास्वरतोदेदीप्यमानान्महा त्स्वयंवरोत्सवात्स्वः स्वर्गंप्रस्थिताः प्रचलिताः सुरवृषभाः सुरो त्तमाइंद्राद्याः कलिंप्रेक्ष्यतद्गतिंतस्यकलेर्गतिंगमनंपप्रच्छुःयः कलिः शुभासु कृतिषुकार्येषुअरतः नरतः विरक्तइतियावत्कीदृशाः सुरो त्तमाः स्वरतः कंठध्वनेः घननिभाः घनोमेघस्तत्सन्निभाः कलि विशेषणंवा दमयंतीस्वयंवरात्स्वर्गंगच्छंतोदेवामध्येकलिंदृष्ट्वाकुत्रग च्छसीतितद्गमनंपृष्टवंतइतिभावः स्युरुत्तरपदेव्याघ्रपुंगवर्षभकुंजराः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिंहशार्दूलनागाद्याःपुंसिश्रेष्ठार्थगोचराः महउत्सवउत्सवइत्यमरः पप्रच्छुरितिप्रच्छधातोर्लिटि ॥ १ ॥

यशसामा यामितया हृतः श्रिया भीमदुहितृ
माया मितया ॥ तदधिगमाया मितया
स्पृहाया द्य मनुष्य मायामि तया ॥ २ ॥

देवैर्गमनंपृष्टः कलिराह यशसामिति यशसांआयामितयाकीर्तीनांदैर्ध्यवत्तयाअतियशस्विन्या इन्नंतात्तल् भीमदुहितृमायांभीमस्यराज्ञोदुहितापुत्रीदमयंतीतन्मायांतद्व्याजंइतयागतयातयाश्रियालक्ष्म्याहृतआहृतचित्तः तदधिगमायदमयंतीरूपलक्ष्मीलब्धयेऽमितयाऽसंख्यया बहुतरयास्पृहयाइच्छयाद्यास्मिन्वर्तमानदिनेमनुष्यलोकमायानिगच्छामि आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियांत्वमीआहुर्दुहितरंसर्वेइत्यमरः आयामीतियातेर्लटि ॥ २ ॥

इति विकलोमायाया स्त दुक्त ऊचे जनो ऽमलो
मायायाः ॥ शुभशीलो मायायाः स्थितोनलोऽ
स्या वरो ऽनुलोमायायाः ॥ ३ ॥

इतीति इत्यनेनप्रकारेणतदुक्तस्तेनकलिनोक्तोभाषितः अमलोनिर्मलःअमरोवारलयोरैक्यात् जनोदेवलोकऊचेऽकथयत् किमकथयदित्याह अमायायानिर्व्याजायाः अस्याः दमयंत्याः शुभशीलउत्तमस्वभावोनलः वरः स्थितः वरः प्रसिद्धः कीदृश्याः विकलोमायायाः विकलोदीनः उमायाःपार्वत्याअयः शुभावहोविधिर्यथातादृश्या पार्वत्युत्तमभाग्यायाः कीदृश्याः अनुलोमायायाः अनुलोमःअनुकूलअयः शुभादृष्टंयस्याः तस्याः मायायाः मांगच्छ दमयंत्यानलोवृतस्त्वंमागच्छेतिभावः यद्वा मायायादंभतः बुद्धितोवावि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कलः सनूत्वंमागच्छेत्यर्थः यद्वा देवलोकाविशेषणम् मायाशांबरीकृपा दंभोवुधिश्चेतिहेमः ॥ ३ ॥

वच इति वस्वादिभ्यः श्रुत्वा कलि रुत्सवासव स्वादिभ्यः ॥ मखसर्वस्वादिभ्य श्चुकोपदोषा त्स मदभुवः स्वा दिभ्यः ॥ ४ ॥

वचइति सकलिरुत्सवासवस्वादिभ्यः उत्सवलक्षणोयआसवो मधुतत्स्वादिभ्यः पीतवद्भ्यः मखसर्वस्वादिभ्यः मखस्ययज्ञस्यसर्वस्वंयज्ञधनंसोममत्तुंशीलंयेषांतेताहग्भ्योवस्वादिभ्यइंद्रादिदेवेभ्यःइत्युक्तप्रकारंवचःवचनंश्रुत्वामदभुवःमदात्दर्पात्भवतीतिमदभूः तस्मादितिदोषविशेषणंस्वात्स्वकीयाद्दोषाद्दूषणाच्चुकोपक्रुधोऽभूत्कलिः कथंभूतइभ्यःआढ्यः मघ्वासवोमाधवकःसप्ततंतुर्मखःक्रतुः कुपकोपेअस्माल्लिटि स्वंज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोस्त्रियांधने इभ्यआढ्योधनीस्वामीत्यमरः ॥ ४ ॥

प्रबलतमान् बलतया संयोज्य नलें सुरो त्तमान् बलतया ॥ तेना मानवलतया तरुणेवतया स्यतां न मानवलतया ॥ ५ ॥

प्रबलेति यादमयंतीसुरोत्तमान्देवश्रेष्ठान्प्रबलतमानुत्कृष्टबलान् अबलतयाअवलत्वेनसंयोज्यविगणय्यमानवलतयाअहंकारसामर्थ्येननलेबलतनलेऽन्वरज्यत यद्वा तयाकिंभूतयामानवलतयामनुष्यरतयारलयोरैक्यात् तयादमयंत्यातेननलेनअमासहनआस्यतांनस्थीयताम् कयाकेनेव नवलतयानवीनव्रतत्यातरुणेववृक्षेणेव यादमयंतीदेवानसमर्थान्ज्ञात्वानलमवरिष्टसानलेनसहावियुज्यतामितिशापोतिभावः यद्वा प्रबलतमान्देवान्सयोज्यस्वयंवरमानाय्यबलत

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यास्त्रीत्वेननलेयानुरक्तेत्यर्थः अबलायाभावोऽबलता त्वतलोर्गुणव चनस्येतिपुंवद्भावः यथालतासुरवृक्षान् अबलतयाअसारत्वेनसंयो ज्यनलेतुच्छतृणेवल्यतेपश्चात्तेनसहतयाक्षणमपिनस्थीयतेतथेत्यर्थः लतयाकथंभूतयामानबलतयामानेविस्तारेवलताअतिशयोयस्यास्त येतिभावः अमासहसमीपेच आस्यतामित्यासउपवेशनइत्यस्य भावेलोटि ॥ ५ ॥

इति बलवा नंतरतः कलिः किलै तज्ज गाद वानं तरतः ॥ अवहितवा नंतरतः समृद्धिषु नलस्य विविशिवा नंतरतः ॥ ६ ॥

इतीति इत्यनेनप्रकारेणबलवान्कलिरेतत् पूर्वोक्तंशापवचनंजगा दकिलनिश्चये अतःअनंतरंअंतरतःछिद्रतः छिद्रंअवकाशंवाप्राप्य ल्यब्लोपेपंचमी यद्वा अंतरतः अंतर्द्धानात् समृद्धिषुसंपत्सुसत्सु सद्वृद्धिष्वितिपाठेपूर्वोक्तशापवचनवृद्धिषुइत्यर्थः अवहितवान्सा वधानः वानंवनसमूहंतरतोगच्छतोनलस्यांतः हृदयंविविशिवान्प्रवि वेश यद्वा अतंरतद्वृद्धिषुइतिपाठेअवकाशशापदुःखबाहुल्येषुअवहि तवान्सावधानः यद्वांतरंविनाशंतनोतीत्यंतरतत्ताद्दशावृद्धयः नल स्यऋद्धयोधनागमास्तेषु यद्वां तरतवृद्धिषुअंतरच्छिद्रंतद्वृद्धिषुछि द्रबाहुल्येषुसावधानः अथवांतरतद्वृद्धिषुअंतरेमध्येतद्वृद्धिषुतस्यनल स्यवृद्धिषुधनागमेषुअवहितवान्यथावृद्धिर्नभवतीति पुनरंतरतःना शरतः एवंपूर्वोक्तंशापवचनंकलिरुक्तवान् प्रवेशाच्छिद्रान्वेषणसा वधानश्चमृगयांगतस्यनलस्यहृदमध्यास्तेतिभावः अंतरमवकाशा वधिपरिधानांतर्द्धिभेदतादर्थ्ये छिद्रात्मीयविनाबहिरवसरमध्येंऽतरा त्मनिच अंतोऽध्यवसितौमृत्यौस्वरूपेनिश्चयेंतिके वानमिति त स्यसमूहइत्यण् विशप्रविवेशइत्यस्माल्लिटिक्कसौकृतेविभाषागमह नविदविशामितिवसोरिड्विकल्पः ॥ ६ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सो ऽथ स दारोदरतः पुष्करविजितो नलः सदारो दरतः ॥ व्याजा द्दारोदरतः स्वपुरा न्निर्यातवानु दारोदरतः ॥ ७ ॥

सोथेति अथकलिप्रवेशानंतरंदारोदरतः द्यूतसंबंधिनोव्याजात्कप टात्पुष्करेणभ्रात्राविजितःपराजितः सनलः दरतः भयात् पीडया वाउदारोदरतः उदारंविशालमुदरंमध्यंयस्यताद्दशात्स्वपुरात्सगृहान्न गराद्वासदारः दारादमयंतीतयासहितोनिर्यातवान्निरगमत् यद्वा राज्यभ्रंशानंतरंकलिसंक्रमणात् नलस्यजलोदरंजातमितिपुराणवा र्ताबृहदुदरहेतोरित्यर्थः कीदृशः सदासर्वदारोदेअस्त्रुक्षरणेरतोनुर क्तः रुद्दन्निनियावत् दरोदरदुरोदरेइतिवैजयंती तस्येदमित्यण् पंच म्यास्तसिल् अगारेनगरेपुरः दरोस्त्रियांभयेश्वभ्रे उदारोदातृमहतो रित्यमरः ॥ ७ ॥

असमानाना हा रिः स्मै नं शब्दां श्च कि ममुना नाहारि ॥ अपि तेना नाहारि भ्रांतं भूषण मपास्य नानाहारि ॥ ८ ॥

असेति अरिःशत्रुः पुष्कररिपुरेववाएनंनलंअसमानानुचितांश्चश ब्दान्वाणीराहस्मभर्त्सनवचनान्यशिश्रवदित्यर्थः अमुनानलेनकिं वस्तुनाहारिनहारितम् यद्वा अमुनापुष्करेणअस्यनलस्यसंबंधिकिंव स्तुनअहारिअपितुसर्वमेवहृतमित्यर्थः तेननलेनहारिमनोज्ञंनानाब हुविधंभूषणमलंकारंहारकुंडलकेयूरादिकमपास्यत्यक्त्वाअनाहारि आहारस्याभावोऽनाहारःसोस्यास्तीत्यस्मिन्निति‌ताद्दशमाहाररहि तंयथास्यादेवंभ्रांतंवनेषुभ्रमितं द्यूतेपुष्करविजितोनलोभूषणमपा स्यवनेबभ्रामेतिभावः आहारीतिहृञोलुङिचिणि ॥ ८ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुच मकरोद न्यस्य भ्रम न्नलः पथि पदं सरोद
न्यस्य ॥ न च पुन रोदन्यस्य त्राणायाऽभू त्परं
परोदन्यस्य ॥ ९ ॥

शुचमिति पथिमार्गेसरोदंरोदनंरोदस्तेनसहितंसाश्रु यद्वा सनलः रुदन् रोदनंकुर्वन्पदचरणंविन्यस्याक्षिप्त्वाभ्रमन्नटन् अन्यस्यप्रेक्षकस्यपुष्करस्यवाशुचंशोकमकरोदकार्षीत् चपुनः अस्यनलस्यपरोदन्यस्य पराउदन्यापिपासायस्यतादृशस्यओदन्यस्यओदनार्हस्यपरमन्यदन्न जलादिनात्राणायरक्षणायभून्नाभवत् नलः कंटकवतिमार्गेकोमल चरणतयारुदंपरिभ्रमन्सर्वेषांशोकमकरोत् क्षुत्तृषितस्यास्यरक्षणाय कोपिनाभून्निराहारएवासीदित्यर्थः मन्युशोकौतुशुक्स्त्रियाम् प्रदंन्यबसित्तत्राणस्थानलक्ष्म्यांघ्रिवस्तुषु उदन्येतितदर्हतीतियः अशनायाबुभुक्षाक्षुद्ग्रासस्तुकवलार्थकः उदन्यातुपिपासातृट्इत्यमरः अभूदितिभुवोलुङि ॥ ९ ॥

ना स्य रमा ना वास स्त च्च खगा जहु रर्थ्य-
माना वासः ॥ अपि मदमानावास स्वरोषजल
धिन्तरन् क्षमानावा सः ॥ १० ॥

नास्येति अस्यनलस्यनरमालक्ष्मीनआवासोगृहमाच्छादनंवाआसीदित्यध्याहारःतच्चवासः तस्यवस्त्रंअर्थ्यमानाक्रीडार्थंआहरेतिदमयंत्यायाच्यमानाःखगाः कलिमायाविर्भूताहंसाजहुः दमयंतीपरिहितवस्त्रैकदेशंपरिधायहंसजिघृक्षयास्यवस्त्रंतदुपारिक्षिप्तंतद्वस्त्रंगृहीत्वाहंसाययुःइतिपुराणवार्ता सनलः क्षमानावाशांतिनौकयास्वरोषजलधिंस्वक्रोधसमुद्रंतरन् उल्लंघयन्मदंगर्वंमानमभिमानंचआसाचिक्षेप लक्ष्मीस्थलंवास्यनासीत्कुत्रापिनस्थितवानित्यर्थः पथिचतद्वासोगृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हीत्वापक्षिणोगताःअसौचगर्वाभिमानावत्याक्षीत् आसेत्यसुक्षेपण इत्यस्यलिटि ॥ १० ॥

तापशतेन वसा नौ द्रवे दि तीमौ नगा वृते
नवसानौ ॥ चैलांतेन वसानौ चेरत रेकेन पर्व
तेऽनवसानौ ॥ ११ ॥

तापेति इमौदमयंतीनलौतापशतेनतापाविक्येननौआवयोर्वसामेदोद्र वेत् शोष्यतीतिहेतोरेकेनचैलांतेनवसनखंडेनवसानौछादयंतौअनव सानौनअव सानंमृत्युंययोस्तादृशौनवसानौनवंनूतनंसानुशृंगंय स्यतादृशेपर्वतेनगैर्वृक्षैरावृतेयुतेचेरतुश्चालितवंतौअतिधर्मेएकेनपाठां तेनाच्छादयंतौइमौमरणरहितौपर्वतेचलिताविितिभावः नगावृतेइत्य त्रसुखादृतेइति पाठेसुखंविनापिअविनाशिनौइत्यर्थः हृन्मेदस्तुवपा वसा युष्मदस्मदोःषष्ठीचतुर्थी द्वितीयास्थयोर्वानावातिनौइत्यादेशा द्रवेदितिद्रुगतावित्यस्यालिङि शैलवृक्षौनगावगौ स्नुःप्रस्थःसानुरः स्त्रियामित्यमरःचेरतुरितिचरतेर्लिटि ॥ ११ ॥

तद्वासः स्वापायां नीति रियं चे ति विपदि
सस्वा पायां ॥ निजवासःस्वापाया न्निकृत्य
ता मुमुंच दिह सस्वापायाम् ॥ १२ ॥

तद्वासइति सनलः कलिरुच्छन्नबुत्धित्वात् विपदिविपत्तौरियमेवं नीतिझतिमत्वातांदमयंतीम् स्वापायांस्वापंआयातीतिस्वापायाता दृशींसुप्तांसस्वापायांस्वस्यापायोविश्लेषस्तत्साहितांपुनःस्वापायांस्व स्मात् अपगतः शुभावहविधिर्यस्याः तांदुरदृष्टामित्यर्थः तांदमयंती मिहवनेनिजवासस्वापायात् निजंस्वकीययद्वासः स्वंचधनंतदपा यात्तदपगमात्तद्वासः तस्यादमयंत्यावासोवसनंनिकृत्याच्छिद्यामुंचत्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्याक्षीत् यद्वा विपदिकिंभूतायांस्वापायांस्वेनआत्मनाआप्य तेप्राप्यतेस्वापातस्यांसत्यांसस्वापापांस्वापयुक्तायांदमयंत्यांसत्यांइ त्यर्थः नलोवनेप्रसुप्तांदमयंतींवसनार्धंछित्वाऽमुंचदितिभावः अमु चदितिपाठेलुङिग्लादित्वादङ् ॥ १२ ॥

बभ्रामान स्तेन श्रमेण कलिना विधूयमान स्तेन ॥ स हि रिपुमानस्तेनः स्वभाग्यदोषाः क्वसमहिमान स्तेन ॥ १३ ॥

बभ्रामेति रिपुमानस्तेनः शत्रुवर्गापहारीसनलश्रमेण प्रयासेनान स्तेननास्तंगतेनसताअत्यंतपरिश्रमेण दुःखातूतेनकलिनाविधूयमा नः कंपितसन्ः अथवाकलिनाअनस्तेनामुक्तेनश्रमेणयस्यश्रमस्य दुःखस्यकलिः प्रयोक्तातेनपरिश्रमेणदत्यमानः सन्बभ्राम पर्य टितवान् हियस्मात्कारणात्तेस्वभाग्यदोषाः स्वपूर्वार्जितदुःकृता दिकर्मदोषाः क्वकस्मिन्समहिमानः समहत्वाः नअपितुसर्वत्रैवपू र्वकर्मप्रधानमृयतोऽयमीदृगवनीशोप्येकाकीगतराज्यभारोवनेपर्य भ्रमीत् ॥ १३ ॥

मृगकुल मार स दावि श्रम मभितापातुरो ममार सदा विः ॥ स्फुरिततमा रसदा वि- स्तृता नगा यत्र विपिन मारस दावि ॥ १४ ॥

मृगेति सनलोदाविदावोवनवान्हिस्तत्संयुक्तंप्रज्वलद्दावंविपिनंवनं मारजगाम यत्रयस्मिन्विपिनेमृगकुलंमृगगणंअविश्रमंआसमंततः अविश्रमंविश्रांतिरहितंआविर्भूतश्रमंवायथास्यादेवंआरसत् आर्ति शब्दंकुर्वत् जलाभावात्तृषाकुलंममार विःपक्षीअभितापातुरोऽभि समंततोयस्तापः संतापस्तेनआतुरः क्लांतः सदासर्वदाममारमृतवा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्‌ सदावीतिनिर्विसर्गपाठेविपिनंकिंभूतंअविनविद्यंतेवयःपक्षिणो यत्रतादृशंअभितापातुरइतिनलविशेषणइत्यर्थः विस्तृताविस्तीर्ण शाखाः रसदाः रसोभयानकरसस्तंददातीतितादृशाः निर्यासदाःवा स्फुरिततमाः प्रकाशिततमानगावृक्षाः स्फुटितमाइतिपाठेविदीर्णाः विस्तृताः भूमौआस्तीर्णाः रसदाः निर्यासदाः दवाग्निनादत्यमानत्वा त्सशब्दावानलोदवानलाकुलंवनंगतवान्‌ यत्रभयप्रदविस्तीर्णशा खाः वृक्षाः यस्मिन्नतिगहनतरुदर्शनेनभयंभवतीतियावत्‌ यत्रचला अलसामृगाइतस्ततोधावंतः कृताक्रंदाः संतोमृताः पक्षिणश्चमृताः तादृशंविपिनंमरुदेशंगतवानितिभावः ॥ १४ ॥

शोकभरोदस्तेन श्रुतः स च नला द्रवे ति रोद
स्तेन ॥ द्रुति मकरोद स्तेन स्वय मि त्यूचे
भयं पुरो दस्तेन ॥ १५ ॥

शोकेति तेननलेनशोकभरोदस्तेनशोकातिशयेनउदस्तेनव्याकुले नउतूऊर्ध्वंअस्तेनक्षिप्तेनशरीरादुत्क्रांतजीवेन हेनलआद्रवागच्छेति रोदः रोदनंश्रुतः आकर्णितः तेनकारणेनसचनलः द्रुतिंवेगंअकरोत्‌ चपुनः हेअस्तेनअस्तः इनोप्रभुर्यस्यअनाथहे अदः इदंतेतवभयंनइति पुरोग्रेस्वयंऊचेउक्तवान्‌ स्वकमितिपाठेस्वकंस्वकीयंआत्मसंबंधिभ यंतवनास्तीत्यर्थः शोकभरविक्षिप्तचेतसानलेननलागच्छेतिकर्कोटक नागरोदनंश्रुतंसवेगेनतत्रगत्वातेइदंभयंनभविष्यतीत्यवोचदितिभा वः अस्तेनसइतिविसर्गपाठेअस्तेनः अस्तः कांत्यातिरस्कृतइनः सूर्योयेनेतिनलविशेषणम्‌ द्रुगताविस्यस्यलोटिमध्यमे ऊचेर्ब्रुवोलि टिस्यात्पुरः परतोग्रतः भीतिर्भीःसाध्वसंभयमित्यमरः ॥ १५ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्व भवान् शंस त्वस्य त्वापद मित्या श्रयो नृशं
सत्वस्य ॥ तं देशं सत्वस्य प्राप नलः सत्व
रो भृशं स त्व स्य ॥ १६ ॥

क्वेति सतुनलोभृशमत्यर्थंसत्वरः त्वरायुक्तः सन्अस्यसत्वस्यप्रा
णिनस्तंदेशंप्रापगतवान्भवान् क्वास्तीतिशंसतुआपदंअस्यतुत्यजतु
इतिनिगद्येतियावत् कीदृशोनलः अनृशंसत्वस्यअक्रौर्यस्यकारुणि
कत्वस्याश्रयोनिवासः रोदनश्रवणानंतरंनलोगत्वाभवान्कास्तिक
थयतुआपदंविपत्तिंजहातुइतिनिगद्यदद.क्षिमविशदितिभावः शंसतु
शंसुस्तुतावित्यस्यानेकार्थत्वाद्वदनमात्रार्थः अस्यत्विति असुक्षेपणेइ
त्यस्यलोटि विपत्त्यांविपदापदौ नृशंसोघातुकः क्रूरः प्रापेत्यापेर्लिटि
सत्वमस्त्रीतुजंतुषुइत्यमरः ॥ १६ ॥

अथ पवनाश मयंतं क्वा पि दवाग्नौ ददर्श नाश
मयंतम् ॥ स्वबलेना शमयंतं रुज मजिघृक्ष
च्च पुन रनाश मयंतम् ॥ १७ ॥

अथेति अथसमीपगमनानंतरंमयंनलः तंपवनाशंपवनंवातमश्ना
तीतिपवनाशस्तादृशंतंसर्पंकर्कोटकंक्वापिदवाग्नौकस्मिन्नपिदवदह
नेअयतंगच्छतंइतस्ततः विनाशंमृतिमयंतंगच्छंतंनिनश्यंतंददर्शाद्रा
क्षीत् कीदृशंस्वबलेनस्वप्रभावेनरुजंपीडामशमयंतंअपरिहरंतंपुनः
अनाशंआशाजीविताशातद्रहितम् अनाशंनमृतंमुमूर्षुंवा अजिघृक्ष
च्चपुनः ग्रहीतुमैच्छत् नलोदवदहनदह्यमानंकर्कोटकमपश्यद्ग्रही
तुंचैषीत् जिह्मगःपवनाशनः ग्रहउपादानेऽस्यसनिग्रहगुहोश्चेती
ट् निषेधाद्दित्वेकृतेलङिरूपं ॥ १७ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स च धृतनाग स्तेन स्वविषेण विरूपितो
मनाग स्तेन ॥ सहितो नाग स्तेन प्रोक्त
श्चा त्मा स्तु वेदनाग स्ते न ॥ १८ ॥

सचेति सचनलः धृतनागोधृतसर्पः मनागस्तेनमनाक्ईषत् अस्तेन क्षिप्तेनतेनकर्कोटकेनस्वविषेणविरूपितः विरूपोऽसुंदरःकुब्जःकृतः अनागस्तेनआगस्तनोतीत्यागस्तोनआगस्तोअनागस्तोअनागस्त स्तादृशेननिरपराधिना नलः किंभूतःसहितः हितंप्राणरक्षणलक्षणं तेनसहितः कृतात्मरक्षउक्तश्चकिमित्याह हेनलतेआत्मावेदनागः पीडाभाक् नअस्तुनभवतु तवमत्प्रसादाद्विषवेदनामाभूत् यद्वा यतः सनागः हितः तेनहेतुनाउक्तइत्यर्थः नलः सर्पमुत्क्षिपंस्तेनदष्टोविरूपोभवत्तेनैवचतवविषपीडानभविष्यतीत्यभिहितश्चेतिभावः अत्रकथोपकथनंभारतेऽनुसंधेयम् यथाकर्कोटकनामानागोहंनारदशापाच्चलितुमशक्तः पश्चात्समुनिरेवमाह यदानलोराजात्वामितोनेष्यति तावत्त्वमचलोभूत्वाऽत्रतिष्ठअतस्त्वंमामितोनयस्वअहंतवोपकारोपायमपिउपदेक्ष्यामिइत्युक्त्वासमुष्टिप्रमाणोऽभूत्नलस्तंवनाग्नेरन्यत्र निनाय ततस्त्यक्तुकामंनलंपुनरुवाचपदानिगणन्गच्छततः श्रेयः करिष्यामिततोनलेनएकादिक्रमेणगणयित्वादशेत्युक्तेआज्ञाछलेन नागस्तमदंशयत् ततोनलोविरूपोबभूवनागस्त्वाह जनास्त्वांनजानंत्विति रूपमंतर्धापितम् यत्कृतेत्वंदुःखीजातःसकलिर्ममविषेणांतर्दग्धस्त्वांत्यक्ष्यतिअयोध्यांगच्छ बाहुकनामासारथिरहमितिब्रुवन् ऋतुपर्णनृपसमीपेस्थीयतांसतेऽक्षविजयविद्यांदत्वाऽश्वविद्यांनेष्यतिततस्तवकल्याणंभविष्यति मत्स्मरणार्थंवासोयुगंगृहाणयदाइदं वासःपरिधास्यतितदानिजरूपंप्राप्स्यसिइत्युक्त्वानागोगतइतिमहाभारतवार्ता नुन्ननुत्तास्तनिष्ठ्यूताविद्धक्षिप्तेरिताःसमाः किंचिदीषन्मना

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गल्पेयातनार्तिव्रिवेंदना पीडाबाधाव्यथादुःखं अनागस्तेनेतितनोते रन्येभ्योपिदृश्यतइतिडःप्रत्ययेरूपम् अस्तुअस्तेर्लोटि ॥ १८ ॥

स्या त्तरसा कल्यंते वपु रमुना तेन वाससा कल्पं ते ॥ ये यशसा कल्पंते गुणोदयै र्दधति भूतिसाकल्यं ते ॥ १९ ॥

कर्कोटकोनलमाह स्यादिति हेनलअमुनाआत्तेनगृहीतेनवास सावस्त्रयुगलेनतेतववपुःशरिरंकल्यंतेकलिपीडापगमेतरसावेगेनक ल्यंनिरामयंस्याद्भविष्यति येजनाः यशसाकीर्त्याकल्यंतेश्रीयंतेतेगु णोदयैः गुणानामुदयैरधिगमैः भूतिः संपत्तिः तत्साकल्यंपूर्णत्वंदध तिधारयंति येयशस्विनस्तेगुणोदयवशाल्लक्ष्म्याश्रीयंतएवेतिअतःखे दंमाकुर्विंतिभावः आत्तेनेत्यत्रअंतेनेतिपाठेअध्यवसितेनईप्सितेने तियावत्यशसाइत्यस्यविशेषणंयद्वानिश्चयेनकल्पंस्यादित्यर्थः य द्वा हेअंतेनेतिसंबोधनंअंतेअंतकालेइनप्रभोहेइत्यर्थः वार्तोनिरामयः कल्यः अंतोध्यवसितेमृत्यौस्वरूपेनिश्चयेंऽतिके कलमदेऽस्यानेका र्थत्वाच्छ्रयणमर्थः तस्मात्कर्मणिलटिरूपम् समग्रंसकलंपूर्णम् १९

अपि च विना मानेन श्रयणीयः सर्तुपर्ण नामा नेनः॥ स्वांगेनाऽमा ने ऽन स्यु र्विपदो न हि नृणां क्व नामाऽनेन ॥ २०॥

अपीति सएवाह हेअनेनः निष्पापनलहेइनप्रभोमानेनाभिमाने नविनापिचऋतुपर्णनामाऋतुपर्णाख्यो ऽनेनस्वांगेनस्वशरीरेणअमा सहश्रयणीयोनअपितुश्रयणीयएव तत्रमानंनकार्य्यमितिभावः यद्वा ऋतुपर्णनामाइनःप्रभुः नश्रयणीयइतिनेत्यर्थः हियतःदेहिनांप्राणि नांक्वनासकुत्रनामविपदोनविपत्तयोनअपितुप्राणिनोविपदापरिभूयंत

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवअनेनेतिनिर्विसर्गपाठेनविद्यतेइनःयस्ययस्माद्वासअनेनःचक्रवर्तित्वात्तस्यसंबोधनेहेअनेनतथाचसार्वभौमत्वमानंनकार्यमितिभावः त्वयाऽनेनकुब्जशरीरेणसमयप्रतीक्षयाऋतुपर्णआश्रयणीयः प्राणिनांविपद्भवत्येवेतिसमाश्वासयादितिभावः कलुषंवृजिनैनोघमंहोदुरितदुष्कृतम् नामप्रकाश्यसंभाव्यक्रोधोपक्रमकुत्सने गर्हासमुच्चयप्रश्नशंकासंभावनास्वपि ॥ २० ॥

व्रज सुख मायाही नश्री रित्यं तर्हितः शमाया ऽहीनः ॥ स्निग्धो मायाहीनः स्या जनतायाः क्व नो त्तमाया ही नः ॥ २१ ॥

व्रजेति हेनलकथंभूतःइनश्रीःइनस्यसूर्यस्यश्रीरिवश्रीर्यस्यसूर्य्यकांतिः अथवाइनश्रीरितिसर्पविशेषणंयुक्तंचैतत्नलस्यविषेणंतदानींविरूपत्वात्व्रजगच्छउद्दिष्टमृतुपर्णसमीपमितियावत् किमर्थंशमायशांत्यैसुखंआयाहिआप्नुहीत्युक्त्वाऽहीनःसर्पराजोऽन्तर्हितः एनमेवार्थमुपोद्घातयति हियतःउत्तमायाजनतायाउत्कृष्टस्यजनसमूहस्यमायाहीनोनिर्दंभःइनः समर्थःस्निग्धोमित्रंक्वकुत्रनस्यात्अपितुसर्वत्रैवस्यात् कर्कोटकोनलंव्रजसुखंचलभस्वेत्युक्त्वांतर्द्धेसज्जनस्यसुहृन्मिलत्येवेतिभावः स्निग्धोवयस्यःसवयाः इनःपत्यौनृपार्कयोरितिमेदिनी स्यादस्तेर्विधिलिङि जनतेति ग्रामजनबंधुसहायेभ्यस्तल् ॥ २१ ॥

प्रीतिवशा दनवनतः कृत्वा त द्वसन मात्म साद नवनतः ॥ बहुमांसादनवनतः सो ऽस्मा दृतुपर्ण मा ससाद न वनतः ॥ २२ ॥

प्रीतीति अर्थात्सनलःप्रीतिवशात्अनवनतःननवनंस्तुतिःअनवनंतस्मात्पंचम्यास्तसिल्तथाचप्रीतिवशादेवतद्वस्त्रंगृहीतंनतुस्तवंकृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वेत्यर्थः तद्वसनंवस्त्रंआत्मसात्कृत्वागृहीत्वाअस्माद्वनतःअरण्यात् ऋतुपर्णनासससादअपितुआससादैवकाक्वर्थैनञ्किंभूतात्नअवनंरक्षणंयस्मितस्माद्रक्षाहिनाद्बहुमासादनवनतः बहुतरायेमांसादनाव्यालाःसिंहशार्दूलराक्षसास्तेषांवनतःवन्यतेसंभक्त्यतेस्मिन्निति वनंतांद्दशाद्बहुक्रव्यादसंभक्तात्समूहात् वस्त्रमाच्छादनंवासश्चैलंवसनमंशुकम् तदधीनवचनइतिसातिः वनषणसंभक्ताविंत्यस्यवनतइति आससादेतिसदेर्लिटि ॥ २२ ॥

अकृत मुदा यंतारं तम मनुत सो ऽध्वनो यदा
यं तारं॥ ध्वनिसमुदायं तारं दधतो ऽस्य हया
श्चतं तदा ऽयंता रं ॥ २३ ॥

अकृतेति सऋतुपर्णःतंनलंमुदाहर्षेणयंतारंसारथिमकृतसोयंनलोयदा ध्वनोमार्गस्यतारंतारणंअमनुतमेनेअंगीकृतवान् तदातस्मिन्कालेतारमत्युच्चंध्वनिसमुदायंहेषासमूहंदधतःकुर्वतोऽस्यऋतुपर्णस्यहयाअश्वाअरंअतिशीघ्रमावंतआजग्मुः यदाऋतुपर्णाल्लब्धसारथ्योनलोमार्गेत्वांयथेष्टंतारयामीत्यंगीकृतवांस्तदाहेषमाणाऋतुपर्णवाजीनोऽतिशीघ्रंचेलुरित्यर्थः नियंताप्राजितायंतासूतःक्षत्ताचसारथिः तारोत्युच्चैस्त्रयस्त्रिषुइत्यमरः अयगताविंत्यस्यात्मनेपदिनआयंत ॥ २३॥

अथ सहसा दमयंत्या सा दमयंत्या ऽत्मश
र्म निद्रा मुमुचे ॥ जीवितसाद मयंत्या साद
मयं त्याग मकृत स च यदा तस्याः ॥ २४ ॥

अथेति अथनलापगमानंतरमात्मशर्मस्वसुखंदमयंत्यांउपतापयंत्यादमयंत्याभैम्यासानिद्राशयनंसहसाशीघ्रंमुमुचेत्यक्त्का कीदृश्या जीवितसादंजीवितस्यसादमवसादंविनाशंअयंत्यागच्छंत्याप्राणान्जहत्येतियावत्सचनलः सादमयंदुःखमयंत्यागंपरित्यागंतस्याःदमयं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्याः यदायस्मिन्कालेअकृतकृतवान्नलेऽपयातेवनप्रदेशसुप्तयाद मयंत्या निद्रामुक्ताकदाअयंनलः दुःखप्रचुरंतत्यागंयदाऽकार्षीत् दमुउपतापेऽस्यण्यंतस्यशत्रंतस्यस्त्रीत्वेदमयंत्येतिरूपंम् साद्यते ऽवसाद्यतेऽनेनेतिसादोदुःखमूत्यजहानावित्येतद्धात्वर्थत्वेनकंठोक्तए वार्थः अकृतेतिकृञोलुङि जीवितसादमित्यत्रधीहिंसादमितिपाठेधी हिंसाबुद्धिनाशस्तंददातीतिसः तनलंअयंत्याचिंतयंत्यानलःकगतः अहंवाकगच्छामिकुत्रतंपश्यामीतिभावयंत्याअयधातोर्गत्यर्थकत्वा त्ज्ञानार्थकत्वमित्यर्थः ॥ २४ ॥

सा ऽत्र ससादा रामा सीते व त्रास मास
सादा रामा ॥ या प्रासादारामा नुपेत्य भर्त्रा
रतिं रसा दा ऽरा मा ॥ २५ ॥

सेति अत्रभयंकरेवनेसारामादमयंतीससादासदुःखात्रासंभयंआस सादप्राप्तवती काइव अरामारामरहितासीतिवयादमयंतीपूर्वंप्रासादा रामान् प्रासादान्नृपगृहान्आरामान्उपवनानिउपेत्यआगत्यरसा त्स्नेहात्भर्त्रानलेनअमासहरतिंक्रीडांआरप्राप प्रासादोदेवभूभुजाम् आरामस्यादुपवनं सुंदरीरमणीरामा अमासहसमीपेचेत्यमरः ॥२५

तत्र पदे व्यालीना मथ विभ्रांतं वने च दे
व्या ऽलीनां ॥ तरुवृंदे व्यालीनां ततिं दधा
ने तया ऽस्पदे व्यालीनां ॥ २६ ॥

तत्रेति अथानंतरंतत्रतस्मिन्नरण्येतयादेव्यादमयंत्याचपुनः बहुविभ्रां तंबहुधाविभ्रमितंपर्यटितम् नलमन्वेषयंतीतिशेषःकीदृशेवने व्या लीनांसर्पिणीनांपदेस्थाने पुनस्तरुवृंदेव्यालीनाच्छन्नामासक्तामली नांभृंगाणांततिंसमूहंदधानेधारयति पुनःव्यालीनांवयःपक्षिणस्तेषा मालीनांपंक्तीनामास्पदेप्रतिष्ठास्थले आलीसख्यावलीअपि षट्पद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रमरालयः देवकृताभिषेकायाम् विश्रांतमित्युदितोवेतीङ्विकल्पः प्रतिष्ठास्थानमास्पदम् ॥ २६ ॥

वेगबलापासितया वेण्या भैमी युता लला
पा सितया ॥ नृप सकलापासितया ह
त्वा रीन् बांधवान् किला पासितया ॥ २७ ॥

वेगेति वेगवलेनधावनबलेनअपासितया।विस्तृतयाअपगताआसिताउपवेशनत्वंअथवाअसिताविद्यमानतायस्याःसातयात्रुटितयाअसितयाइयामलयावेण्यायुतासहिताभैमीदमयंतीललापाविललाप किंविललापेत्याह हेनृपेहेराजन्तयासकलापासितयाकलापस्तूणीरःअसिःखड्गःताभ्यांसहितःसकलापासिः तस्यभावस्तत्तातयाकरणेन यद्वा वेगबलापासितयावेगंचबलंचआप्नोतीतिवेगबलापःसचासिश्चवेगबलापासिर्यस्यसतस्यभावस्तत्तातयादृढखड्गवत्त्वेनकथंभूतयासकलापासितयासकलानांअर्थात्शत्रूणांअपासितयाअपहृतखड्गतयाअरीन्हत्वाबांधवान्बंधूनपासिरक्षसिकिलेतिवार्तात्वयिखड्गधारिणिसतिअन्येषांहस्तात्खड्गाः स्वयंपततीतिभावः सत्वमेकाकिनींमांवनेत्यक्त्वाकथंगतोसिपुनर्नायासीतिभावः वार्तासंभाव्ययोः किल कलापोभूषणेवर्हेतूणीरेसंहतेपिच अपासीति पारक्षणेइत्यस्यलटि ॥ २७ ॥

स कथं मानवनानान्यायवि दाचरसि सेऽव्य
मानवनानां ॥ धृतसीमानवनानां दाराणां
त्याग ऽमनुपमा ऽनवनानां ॥ २८ ॥

प्रेमकरुणादिकमनुस्मरंतीआह सेति हेमानवनानान्यायवित्मनुःप्रजापतिस्तत्प्रणीतोयोनानाबहुप्रकारोन्यायोधर्मशास्त्रंतद्वेत्तीतितादृक् यद्वा मानवामनुष्यास्तेषांनानान्यायोव्यवहारस्तंवेत्तीतिज्ञातसकल

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धर्मशास्त्रमानुषव्यवहाराभिज्ञ हेअनुपमनिरुपम सत्वंअनवनानां अवनंरक्षणंतद्रहितानांसेव्यमानवनानांसेव्यमानमाश्रीयमाणंवनमरण्यंयैस्तादृशानांवनमध्यगतानान्धृतसीमानवनानांधृतसीमायाः कुलमर्यादायाः नवनस्तवेयैस्तादृशानांदाराणांस्त्रियाःत्यागंपरित्यागं कथमाचरसि करोषिअदुष्टभार्यात्यागेदोषंकथंनविचारयसीतिभावः सकथंमानवनानामितिसानुस्वारपाठेहेन्यायवित् एतस्मिन्कर्मणिधर्मोऽधर्मोऽवेतिविचारपंडितहेकिंभूतानांदाराणांमानवनानांमानानांवनंगहनंयेषांतेषांमानगहनानामित्यर्थःपुंभूम्निदाराः ॥ २८ ॥

परकृत मेतत्वे नः स्मरामि य न्न स्मृतो सि
मे तत्वेन ॥ दोषसमेतत्वेन प्रदूषये ना त्र
संभ्रमेत त्वेन ॥ २९ ॥

परेति हेइनस्वामिन् नलयत्यस्मात्एतन्मत्परित्यागरूपमेनःपापं परकृतंपरेणकलिनाकृतंस्मरामिजानामि तुपुनः त्वंमेमयातत्तस्मात् तत्वेनसतत्स्वरूपत्वेनयथार्थेननस्मृतोसिनज्ञातोसिअपितुतत्त्वतोज्ञातोसि त्वंस्वबुध्याएवंनाचरसि अत्रसंभ्रमेदुःखेदोषसमेतत्वेनसदूषणत्वेनत्वात्वान्नदूषयेनदूषयामिकलिकृतेअपराधेत्वांकथंदूषयामि त्वंसर्वदादूषणरहितइतिभावः नञ्काकर्थेसमौसंवेगसंभ्रमौ दूषयइतिदोषेणावित्यूत्वेरूपम् ॥ २९ ॥

हृदयौका य स्तेन स्थीयेत यथै व पावकाय
स्ते न ॥ याव त्काय स्ते न त्यज्येत स्व हृदि
चा धिकायस्तेन ॥ ३० ॥

हृदेति दमयंत्यात्मानंप्रत्याह हेस्वआत्मन्यावत्यत्कालपर्यंतंतेत्वयाकायः नत्यज्येतनमुच्येततावत्यस्तेतवहृदयौकाहृदयमोकआश्रयोयस्यसहृदयवासीनलःतेननलेनहृदित्हृदयेअधिकायस्तेनअधि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कमायस्तेनव्याकुलेननस्थीयेतअपितुस्थातव्यमेव किमिव यथैवपावकाय:पावके ऽग्नौअयोलोहमिवदहनगतलोहमिव हेआत्मनूयावत्वमिमंकायंनजहासितावद्विरहानलप्रदीप्तमत्धृदिनलःस्थास्यतियथाग्नौलोहमेवंतस्यमत्प्रियस्यदुःखंभवतीतित्वंशीघ्रंकायंजहीहीतिभावः स्वोज्ञातावात्मनि स्थीयेतेतिघुमास्थागापाजहातिसांहलीतिदीर्घः पिंडंकालायसायसीआयस्तेतिआङ्पूर्वकयसुप्रयत्नेधातोःक्तः ३०

य स्य पदे शं कमितः स्वजनो यं प्राप्य जन पदेशं कमितः॥ अरिवृंदे शंक मितस्मित सत्व मुपागतो सि देशं क मितः ॥ ३१ ॥

यस्येति अयंस्वजनोबंधुवर्गः यस्यपदेतवराज्येयंत्वांजनपदेशंराष्ट्राधिपंप्राप्याधिगम्यशंकल्याणंकंसुखंइतः प्राप्तवान् हेकमितकांत अरिवृंदेशत्रुसमूहेअशंकशंकारहितमितस्मितमितपरिहाससत्वंइतोवनात्कंदेशंकांभुवंउपागतोसिगतवानसिआदौयंस्वपदेशमितिपाठे स्वपदेशंशोभनो ऽपदिश्यतइत्यपदेशोनामताद्दशंशोभनाख्यंयंजनपदेशंप्राप्यस्वजनः कंसुखंअयंशुभावहाविधिंइतः प्राप्तः यद्वा स्वपदेस्वस्थानेस्थानांतरंकथंभूतंअशंअकल्याणंइत्यर्थः दमयंतीविलपंतिदमाह हेनलयंत्वांराज्याधिपंप्राप्यात्मीयलोकः सुखंप्राप्तवानूसमानूदुःखजलधौमज्जंतीमुपेक्ष्यअस्माद्वनात्कंदेशंगतवान् पदंव्यवसितत्राणस्थानलक्ष्म्यंघ्रिवस्तुषु शंसुखे कमुकांतावित्यस्यक्के बंधुस्वस्वजनाः समाः स्वोज्ञातावात्मनिस्वत्रिष्वात्मीयेस्वोस्त्रियांधनेस्वपदइतिनिमित्तसप्तमी ॥ ३१ ॥

यद्यशसा नुरु रोदः कुहरं यो द्वेष्टु रंजसा नु रुरोदः ॥ अद्रेः सानु रुरोदः कि माप दयितो ममे ति सा नुरुरोद ॥ ३२ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदिति हेरुरोहेचित्रमृगयद्यशसायस्यकीर्त्यारोदः कुहरंद्यावाभूम्यं तरंएकोक्त्यारोदः शब्दः सांतः स्वर्गभूमिवाचीतयोः कुहरंविवरं अनुरुअविपुलंअल्पंकृतंतत्रनमातीतिभावः यश्चद्वेष्टुः द्वेषंकुर्वतोनुः पुरुषस्यअंजसाझटितिउरोदः उरोवक्षोद्यतिखंडयतीतिताट्क्द्विष द्वक्षोविदारणशरवर्षीत्यर्थः सममदयितोवल्लभोनलोऽदोद्रेःऽसानु गिरेः समभूभागंकिंआपप्राप्तवान् इत्युक्त्वाऽनुरुरोदपश्चादरोदत् वने दमयंतीमृगंपृच्छति वनेचरन्क्षीणः यत्कीर्त्याद्यावाभूमीपूरिते य श्चद्विषद्वनदावानलः किंगिरिसानुंप्रातवानित्युक्त्वारुरोदवड्रोरुविपु लम् द्यावाभूमीचरोदसी पुरुषाः पूरुषानरः स्नुप्रस्थःसानुरास्त्रि यौ उरोदइतिउरोद्यतीतिदोअवखंडनेधातोरातोऽनुपसर्गेकइतिकः कृष्णसाररुरुन्यंकुरंकुशंबररोहिषाः आपेत्यापेर्लिटि पश्चात्सादृश्य योरनु रुरोदेतिरुदिर्अश्रुविमोचनइत्यस्यलिटि ॥ ३२ ॥

श्रयकलनामानं तेत्य यं जनो ददति चांगना मानं ते ॥ हार्दे नामा नंते जन मेन मशोक कुरु सनामानं ते॥ ३३ ॥

श्रयेति दमयंत्यशोकमुपगम्याह हेअशोकवृक्षअयंजनोमल्लक्षणआ नंतप्रमणमतीतिकलनांबुद्धिंपूजांवाश्रयआश्रयगृहाण अंगनाः स्त्रि यश्चतेतवमानंपूजांदोहदंवाददतिददते स्त्रीसंस्पर्शात्तवपुष्पोत्पति रितिभावः नामसंभावनायांअतोअनंतेबहुतरेहार्देप्रेमाणिसति एनं जनंतेतवसनामानं स्वनामाख्यमशोकंशोकरहितंकुरु हृदः कर्म हार्दं हायनांतयुवादिभ्योऽणित्यण् हेअशोकत्वांनौमिमामपिशोकर हितंकुर्वितिभावः ॥ ३३ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उच्चशिरोदारा वालप्ये ति वने ऽसुबंधुरो दा
रावा ॥ द्रुति मकरो दारा वा रुक्षं मरुतल
मथो सरोदारावा ॥ ३४ ॥

उच्चेति सुवंधुराअत्यंतसुंदरीउदारात्राउदाराआवागतिर्यस्यास्तादृशी दमयंती उच्चशिरोदारौउच्चसिरसोदारवोदेवदारुद्रुमायस्मिंस्तादृशेव नेइतिपूर्वोक्तमालप्याभाष्यविलप्यवाद्रुतिंवेगमकरोत् गतिंवा य द्वा उच्चशिराउच्चग्रीवाउदारावाउत्ऊर्ध्वआरावः शब्दोयस्याः सा उच्चस्वराउच्चैः विलप्येतियावत् यद्वा एवार्थे बाशब्दः उदाराद क्षिणा उदारोदातृमहतोर्दक्षिणेप्यभिधेयवत् इतिमेदिनिकरःअ स्तिचादंतोपिशिरशब्दः पिंडंदद्यादुयाशिरेइतिदर्शनादित्यर्थः अ थोवेगकरणानंतरंसरोदारावा रोदनशब्दसहितारुदंतीरुक्षंशुष्कंअ वाःजहलीनंनविद्यतेवाः जलंयस्मिंन्तादृशंमरुतलंमरुदेशंआर गत वती क्वचिदतिसुंदरेवनेविलप्यदमयंतीनिर्जलंमरुदेशंगतवतीरुदती तिभावः दारुशब्दस्यवृक्षेवृक्षत्वप्रवृत्तिनिमित्तत्वाद्भाषितपुंस्कत्वेन तृतीयादिषुभाषितपुंस्कंपुंवद्गालवस्येतिपुंवद्भावात्घेरात्वादि वृक्षत्व प्रवृत्तिनिमित्तत्वेचास्यपुंस्त्वाश्रयणात् भद्रदारुद्रुकिलिमंपीतदारुच दारुचेत्यमरः वागतिगंधयोरित्यस्यावेति वासमुच्च एवार्थेइतिहेमः ऋगताविव्यस्यारेतिच ॥ ३४ ॥

मृगकुल मारण्या धिप्रचुरं बिभ्र द्वनं समारण्या
धि ॥ वीथ्या मारण्या ऽधिष्ठितभुजगं भीमजे
य मार ण्याधि ॥ ३५ ॥

मृगेति इयंभीमजादमयंतीमारण्यामरोरियंमारवीतयावीथ्यामार्गे णसमारण्याविमारस्यकामस्यन्याधिः मारण्याधिः तत्सहितंआरवि सशब्दम् यद्वा आरविआराः इतस्ततोजंगमावयः पक्षिणोयत्रतत्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आधिप्रचुरंमानसीव्यथाबहुलंमृगकुलंबिभृत्धारयद्वनंआरगतवतीकीदृशंवनम् व्याधिव्याधोलुब्धकस्तत्सहितंअधिष्ठितभुजगंअधिष्ठिताः भुजगाः रूपायस्मिन्तत् समाख्याधिरितिसविसर्गपाठेदमयंतीविशेषणम् पुंस्याधिर्मानसीव्यथा स्त्रीरुग्रुजाचोपगतापरोगव्याधिगदामयाः आरेतिऋगतावित्यस्यलिटि वीथ्यालिरावलिःपंक्तिःश्रेणीलेखास्तुराजयः वीथीपदव्यपीत्यमरः ॥ ३५ ॥

सास्रवनासारा सावेगमना भीमनंदना सारा सा ॥ सुनयननासा रा सा वजगर मग्रासि चामुना सारा सा ॥ ३६ ॥

सास्रेति सास्रवनासाराअस्रवनंअश्रुजलंतस्यासारोवेगवर्षणंतत्सहितासावेगमनाआवेगउद्वेगः तत्सहितंमनोयस्यास्तादृशीसारासाआरासोरोदनरवस्तत्सहिता यद्वा असारासाअसारः अस्थिरः आसउपवेशनंस्थितिर्वायस्याः साभाविवत् असौभीमिनंदनादमयंतीअजगरंसर्पंआरप्राप्तवती अमुनाचाजगरेणसाराश्रेष्ठासादमयंतीअग्रासिग्रस्ता कीदृशी सुनयननासानयनंचनासाचनयननासंशोभनंनयननासंयस्याः सातादृशीमुनेत्रनासिकेतियावत् मरुतलमटंतीदमयंतीअजगरमद्राक्षीत्तेनचाजगरेणसुमुखीकवलिताइतिभावः वनंसलिलकानने आसारोवेगवर्षणम् नंदिग्रहिपचादिभ्योल्युणिन्यचइतिल्यौनंदनेति द्वंद्वश्चप्राणितूर्यसेनांगानामितिनयननासमित्येकवद्भावः आरेतिऋगतावित्यस्यलिटि अजगरेशयुवाहसइत्युभौ ग्रसुग्लसुअदनेलुङिचिणिवृद्धौअग्रासीति अश्रुनेत्रांबुरोदनंचास्रमस्रुच सारोबलेस्थिरांशेचन्याय्येक्लीबेवरेत्रिषु ॥ ३६ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ शबरो हास्यं तं स्वासूंस्तदसूं श्च रिपुत्त
रोहा स्यंतं ॥ समधिरूरोहा स्यंतं न्यस्य त
दास्ये ऽकरोत् खरो हास्यंतं ॥ ३७ ॥

अथेति अथाजगरग्रसनानंतरंरिपुतरोहारिपूणांतरोबलंहंतीतिरिपुतरो हाशत्रुबलधातकः शबरःकिरातः स्वासून्स्वप्राणान्हास्यंतंजिहास तं तदसूंश्चतस्यादमयंत्याअसून्प्राणान्स्यंतंविनाशयंतमजगरंसमधि रूरोहारूढवान्तंहास्यंहासयोग्यमकरोदकीर्षीत् किंकृत्वा तदास्ये तस्याजगरस्यास्येमुखेअस्यंतंखड्गाग्रंन्यस्यनिक्षिप्यशबरः किंभूतः खरस्तीक्ष्णास्वभावःशबरोदमयंतीप्राणान्विनाशयन्तंमारयिष्यंतंतम जरंखड्गाग्रभिन्नमुखममारयादित्यर्थः रिपुतरोहेतिब्रह्मभ्रूणवृत्रेषुक्किवि तिसूत्रेणब्रह्मादिष्वेवहन्तेः प्रयोगाच्चिन्त्यमिदम् यद्वाशबरः कथंभूतः रिपुतरः हाइतिकृत्वा हाविषादेचशोकेचकुत्सादुःखार्थयोरपीतिमे दिनी हास्यंतमिति ओहाक्त्यागेऽतोलृटः शब्देतिशता पुंसिभून्यस वः प्राणाः तरसीबलरंहसी षोंतकर्मणीत्यस्यस्यन्तामिति समधिरूरो हेतिलिटि हास्यमिति तदर्हतीतियः ॥ ३७ ॥

तां पुन रेका मयतः कृऽशां किरातः स्मरातिरे
कामयतः ॥ कांतारे कामयत स्त्रियं न कांक्षे
दुपह्वरे कामयतः ॥ ३८ ॥

तामिति तांदमयन्तीमेकामेकाकिनींसहायरहितांअयतः शुभदैवा त्कृशांतनुंदैववशात् दुर्बलामित्यर्थः स्मरातिरेकामयतः स्मरस्यकं दर्पस्यातिरेकआधिक्यंसएवामयोव्याधिस्तस्मात्कंदर्पाधिक्यव्याधेर्है तोः किरातः कांतारेमहावनेअकामयतअचीकमत् स्त्रीत्वेनेतिशेषः त्वंममभार्याभवेतिकामनामकरोदितिभावः अत्रहेतुमाह कामयतः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामेनयतः संयतः कामातुरः उपह्वरे रहसिस्त्रियंनाकांक्षेन्नेच्छेत्किंनञ्काक्वर्थः अपीतुकांक्षेदेव उपव्हरंरहासिसन्निधौइतिहेमचंद्रः ॥३८॥

धृतवनमह्यंतेन त्राता सि मया ननु त्व मत्ह्यं ते न॥मानिनि मत्ह्यं तेन प्रसीद शरणागताः क्व मत्ह्यंते न॥ ३९॥

धृतेति शबरोभैमीमाह ननुभोमानिनिदमयंतिधृतवनमह्यंतेनधृतःश्रितोवनमह्यंतोवनभूमिप्रांतंयेनताद्दशेनअह्यंतेनसर्पनाशकेनमया त्वंत्रातासिरक्षितासि तेनहेतुनामह्यंप्रसीदप्रसन्नाभव शरणायात्मंत्राणायआगताः प्राप्ताजनः क्वकुत्रनमह्यंतेनपूज्यंते हेदमयंतिअजगरंविनाश्यमयारक्षितासिअथशरणगतायमेप्रसीद मह्यंतइतिमहपूजायामित्यस्यकर्मणिलटि शरणंगृहरक्षित्रोरित्यमरः नन्वाक्षेपेपरिप्रश्नेप्रत्युक्तावववधारणे वाक्यारंभेप्यनुनयामंत्रणान्नुज्ञयोरपीतिहेमः अंतः स्वरूपेनिकटेप्रांतेनिश्चयनाशयोः अवयवेपीतिहेमः ॥३९॥

सुमुखनिशापे ते नः स्मर दासानिति प्रोच्य व वसापेतेन॥ दत्ते शापे तेन स्थितया ऽसां त्वेन चपलद्दशा पेते न॥ ४०॥

सुमुखेति हेसुमुखनिशापेसुशोभनंमुखंसुमुखंतदेवनिशापः चंद्रइवयस्याःसासुमुखनिशापातस्याः संबोधनेहेशोमनमुखचंद्रेतेतवनो ऽस्मांदासान् स्मरजानीहि इत्यनेनप्रकारेणप्रोच्यउक्त्वा ऽसांत्वेनक्रोधेनस्थितयाचलद्दशाचंचलाक्ष्याशापेदत्तेवसापेतेनवसामेदस्तया ऽपेतेनहिनेनसतामदनाज्वलनदह्यमानमेदसातेनशबरेणकिन्नपेतेअपितुमूर्च्छितमेव नञ्काक्वर्थःक्रुद्धयादमयंत्याशापेदत्तेशबरोमूर्च्छितो ऽभूदितिभावः सुमुखिविशापेतेनेतिपाठेहेशोभनमुखितेतवनःअस्मान्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दासान् स्मरेतिविशापेशापाभावेशापपूर्वमित्यर्थः प्रोच्यतेननपतितामि तिकाकुः हन्मेदस्तुवपावसा सामसांत्वमुभेसमे पेतेइतिपततेः कर्मणिलिटि ॥ ४० ॥

दग्धसरागाहितया दमयंत्या विपिनभूः परा ऽगाहि तया ॥ उच्चतरागाहितया दृष्ट्या घो रा च कंदरा ऽगाहि तया ॥ ४१ ॥

दग्धेति दग्धसरागाहितयादग्धःसरागःसकामोऽहितःशत्रुःशबरोय यासातादृश्यातयादमयंत्याऽपरान्याविपिनभूर्वनभूमिरगाहिअवगा हिता उच्चतरागाहितयाउच्चतरायेअगावृक्षास्तेष्वाहितयाआरोपित यादृष्ट्याचघोराभयावहाकंदरादरीअगाहि कंदरागाहितयेत्येकंपदं वा कंदरायुक्ताद्रौआहितयाक्षिप्तयेत्यर्थः अत्रपक्षेघोरेतिभूविशेषणम् यद्वा परागाहितयापुष्पधूलिभ्याप्तयादृष्ट्यावनभूः अगाहिविलोडि तेत्यर्थः दग्धशबरयातयाभैम्याअन्याऽटवीअवगाहिताघोराकंदरा चादर्शितइतिभावः गाहआवगाहनेस्माल्लुङिचिणि ॥ ४१ ॥

पदवा ऽपदवाप ऽदवा रयतो ऽद्रिवनं विलला प च सा ॥ तरसां ऽतर सांतरसांतर सांन्वय दुःख वृणीष्व सखे मरणं ॥ ४२ ॥

पदवेति अयतःशुभदैवात्पदवापदाभ्यांवातीतिपदवासादमयंतीअ पदवापत् अपगतादवापत् दवाग्निजन्यदुःखंयस्मात्तंतादृशमद्रि वनंपर्वतवनमवापत्लेभे रयतोवेगादवापदितिवा कीदृशम् अवाःन विद्यतेवार्जलंयस्मिंतत्जलरहितंविललापचपर्यदेवीच्च हेसांतरसां तर सांतंअंतसहितंरसांतरंकरुणातिरिक्तंरसोयस्मात्तादृश हेसान्वय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुःखअन्वयः संतानस्तत्सहितंदुःखंयस्मिंस्तादृश सांतरंदुःखइति पाठेअंतःकरणदुःखसहितहे हेअंतरआत्मन्सखेमित्रतरसावेगेनमरणं वृणीष्वावरय पदचारिणीदमयंतीदवविपद्रहितंजलशून्यंगिरिवनगतावि्लापंचाकार्षीत् हेआत्मन्सपरिवारदुःखाकुल मरणमिदानीं वरय सांप्रतंकियत्सहेममरणमेववरमितिभावः अवापदितिआपॢदित्वादङ् रपलपजल्पव्यक्तायांवाचीत्यस्यलिटिलिलापेति अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये छिद्रात्मीयविनाबहिरवसरमध्येऽतरात्मनिचेत्यमरः ॥ ४२ ॥

वृक कोपपुरःसर मासर मासर मा सरमा
भवता ननु सा ॥ कि मृते दयिता ऽदयतोद
यतोदयतो ऽदयतो ऽस्ति ममे ह सुखं ॥४३॥

वृकेति वनेगच्छंतीकंदरातोनिःसृतंव्यात्तमुखंवृकंदृष्ट्वाह हेवृकतरक्षोकोपपुरस्सरंक्रोधपूर्वकंमामांआसरआगच्छमांभक्षयेत्यर्थः मासर इतोमागच्छ ननुभोःसातवस्त्रीवृकीभवतात्वयासरमासलक्ष्मीका भवतुतथाचमांभक्ष्यस्वस्त्रियासहस्थीयतामितिभावः यद्वा सासरमा श्वापदत्वात् शुनीतवस्त्रीत्वयासरमाभवत्वितिशेषः अतोमासरअन्यत्रमागम्यतांमामेवभक्षयेत्यर्थः अयतोदयतोदयतःअयंशुभदैवं तस्यतोदःक्षेपस्तत्रयतोरतउदयोऽभ्युदयोवायस्यतादृशात् अदयतःनिष्करुणाद्दयितात्स्वियान्नलाद्दतेविनाइहावसरेममकिंसुखमस्ति स्वास्थ्यमस्ति यत्तुहेअयतोदयतेतिभिन्नंपदंअयोदैवंतेनयापीडातया यतः बत्वःदैवपीडितउदयतउ ्च्छतः अपरंतथैवेतिध्येयम् यद्वा हे वृककोपपुरःसरंमासरस्वगृहा ्रागच्छआसरपरावृत्त्यआगच्छसात वस्त्रीसरमासलक्ष्मीकाभवत्वित्यर्थः तथाचक्रुद्धःसन्गृहात्मागच्छे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिभावःदमयंतीवृकमाह हेवृकत्वंमांआसरनलाद्दतेममकिंसुखंजी वितेनवाकिंप्रयोजनं अतोमांभक्षयित्वास्वस्त्रियासहैवस्थीयतांमाविर हीभवेतितात्पर्यार्थः तरक्षुस्तुमृगादनः वृकोपि आसरेतिसर्तेर्लोटि माशब्दोऽयन्नमाङ् सरमाशुनी प्रश्नावधारणानुज्ञानुनयामंत्रणेननु पृथग्विनांतरेणर्तेहिरुक्नानाचवर्जने ॥ ४३ ॥

अयि राक्षस भक्षय मां क्षुधितो न वसा ऽन
वसान वसान वसाः॥ रुज मुञ्च जने ऽत्र च
हेकरुणांतरदांतरदांतरदां ॥ ४४ ॥

अयीति भैमीराक्षसंदृष्ट्वाह अयिअहोराक्षसवसाःमेदांसिवसानाच्छाद यअनवसानमरणहीनक्षुधितोबुभुक्षितस्त्वंनवसनतिष्ठमांभक्षय अत्र चजनेमल्लक्षणेकरुणांतरदांतरदांतरद करुणांतरंकरुणावकाशस्तेन दांतमुपशांतंरदांतरंदंतातरंददातीतादृक् करुणाहीनरदनांतरप्रदायक रुजंपीडामुञ्भृत्यजमयिपीडांत्यज अहमंतः हृदयंअदोदत्तवती यद्वा करुणांतरसंतरमद्विषयेदयांत्यजेत्यर्थः हेदांतरदांतरददांतः स मर्थःरदोदंतः तस्यांतरेणद्यतिखंडयतिसहेराक्षसमयिस्त्रीअवध्येतिरु जंत्यक्त्वामांभक्षयतुभ्यमहंशरीरंदत्तवतीत्यवोचादितिभावः अदामिति ददातेर्लुङि यदपि धहेःकरुणांतरदांतरदांतरदांतरदइतिपाठःआंतरं चित्तंद्यतिखंडयतितांरुजंत्यज त्वमत्रजनेकरुणांवहेः हेरदांतददं तांतरप्रद दांतंसंसारांतरइतितदर्थः ॥ ४४ ॥

क रमाकर माकर ऽमाकर ऽमाकलय व्यस
नं मम पाहि हरे ॥ दरतो दरतोदरतोदरतो
विरुतैः मरुतां सुकर त्व मपि॥ ४५॥

करमेति हेरमाकरलक्ष्मीप्रद कब्रह्मन्ममव्यसनंविपदंमाकरंआक

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रंमकराणामयंमाकरस्तादृशमाकरंखनिंआकलयममशोकसमुद्रंजा
नीहि मरुतांदेवानांसुकरअकृच्छ्रकरहेहरेकृष्णनामोच्चारणेनहरति
पातकानिइतिहरिः तस्यसंबाधनंत्वमपिअदरतोदरतोदरतःअदरोऽन
ल्पोयस्तोदोदुःखंतत्ररतंउदरमभ्यंतरंयस्यतादृशात्दरतोभयात्विरुतै
राश्वासनवचनैःपाहिरक्ष यद्वा संसुखंरमालक्ष्मीस्तयोराकरःउत्प
त्तिभूमिःसचासौमाकरःशोभाकरश्चतत्संबोधनंमाकरंमकरसंबंधिस
मुद्रसदृशंमालक्ष्मीःतस्याः आकरःउत्पत्तिस्थानंसमुद्रमिवेतिवार्थः
हेब्रह्मन्ममशोकः समुद्रइवप्रवृत्थःदेवभयापहारिन्हेकृष्णत्वम
पीदृशेकष्टेमामांश्वासवाग्भिःरक्षेत्याहेतिभावः मारुतेवेधसिब्रध्नेपुं
सिकःखनिस्त्रीयामाकरःस्यात्ः एकत्रकरोतीत्याकरःऋदोरप् व्यस
नंविपदिभ्रंशेदोषेकामलकोपजे पाहीतिपारक्षणेस्यलोटि सुकरेति
ईषद्दुःसुषुकृच्छ्राथषुखल् दरोस्त्रियांभयेश्वभ्रे एवंकस्यब्रह्मणोरमाकर
लोकाधिपत्यकंरहरेसुकरशोभनहस्त दरतोदरतोदरतःदरोभयंतस्य
तोदोनाशस्तत्ररतमुदरंयस्यतस्यदरतःशंखस्यमरुतांवायूनांविरुतैर्मां
पाहिरक्षेतिध्येयम् ॥ ४५ ॥

त्वदरिर्नि षधेश समृद्धि मनारमया रमया
ऽरमया ऽभ्रमयाः ॥ व्यसनं त्व मुपैमि कदा
नु सभीशमना श मनाश मनाशमनाः ॥ ४६ ॥

त्वदरिरिति हेनिषधेशनलत्वदरिःपुष्करःअनारःमयाअनवसानयार
मयालक्ष्म्यारमण्याबासमृत्धिंहर्षमारप्राप्तवान् त्वंमयासहअरंशीघ्रंव्य
सनंविपत्तिंअयाःगतवानसिअनाशमनःआशेच्छातद्रहितंमनोयस्या
स्तादृशीयद्वा त्वदरिःकथंभूतःअनाशमनाःनविद्यतेनाशोविनाशोमनो
यस्यसततयेत्यर्थः सभीशमनाभीर्भयंतच्छमनंशांतिस्तत्सहिताशांतर्भा
तिः अनाशंनाशरहितंशंसुखंकदाउपैमिकस्मिन्कालेउपगच्छामिनुपृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च्छायां कदासुखंलप्स्येइतिप्र्यलपत् यातेर्लेङिअयाःउपेमीतीणःवि भाषाकदाकर्ह्योरितिभविष्यतिलट् नुपृच्छायांविकल्पेच ॥ ४६ ॥

य मनायमना यमनाय मना गाभिवीक्ष्य रतं
द्रवती ह परः ॥ स रुषो निषध क्षितिनथा ग
लन्नवमानवमानवमा नवमाः ॥ ४७ ॥

यमनेति अनायमनाअनीतिमनाअनीतियुक्तः नयएवनायःअन्याय परइत्यर्थः यद्वा आयोधनागमस्तद्रहितमनाःसन्परःशत्रुर्मनागी षत्यमनायजीवापहारणायरतमासमकंयंत्वांवीक्ष्येहलोकेपरःशत्रुर्द्र वतिदूरादेवपलायते हेनिषधक्षितिनाथनिषधेशनलगलन्नवमानवमा नगलन्स्खलन्नवमानवास्तरुणास्तेषांमानोगर्वोयस्मिंस्तादृक्स त्वंअनवमाःअवमाःअधमाः नअवमाःअनवमाःश्रेष्ठाःरुषःक्रोधान्व मउद्गिर हेनलयंत्वांकृतानीतिःशत्रुर्हन्तुमुद्यतमीषदप्यालक्ष्यपलाय तेसत्वंपरहृतसर्वस्वः तागिरः कथन्नोद्गिरसिवनेवनेकिमटसीति भावः किंचिदीषन्मनागल्पेद्रुगताविस्यस्यलटिद्रवतीति रुट्क्रुधौ स्त्रियौ टुवमउद्गिरणेऽस्माल्लोटिउद्गिरेति निकृष्टप्रतिकृष्टार्थरेफया प्यावमाधमाः ॥ ४७ ॥

नयमानयमा नय मान य मावस एत्य नि
वास ममुं भवता ॥ भवनीय मपाय मरी नु
दया न्नयतानयता नयता नयता ॥ ४८ ॥

नयमेति नयमानयमान् नयोनीतिर्मानोऽभिमानोयनोविश्रमोनियमो वातान्अयमानः प्राप्नुवान्तस्यसंबोधनेहेनयमानयमानयमाननीतिम भिमानंनियमंच धारयन्यंनिवासंराष्ट्रमेत्यप्राप्यआवसः यस्मिन्रा ष्ट्रेऽतिष्ठः अमुन्निवासंअयताप्राप्तवताउदयानुद्रतोऽयोज्ञानंयेषांतादृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शान् अनयतानयतान् अनयोऽन्यायः तस्यतानोविस्तारस्तत्रयतान् अन्यायासक्तान् अरीन् शत्रूनपायंनाशंनयताप्रापयताभवतात्वयाभव नीयंभवितव्यं हेनलयान्निजराज्यंप्राप्यपूर्वमास्थाः पुनस्तदेवरा ज्यंगच्छतात्वयाशत्रून्विनाशयितुंसमर्थेनभवितव्यमितितदेवनिजपु रंगच्छेतिव्यलपदितिभावः आवसइत्यस्याधारस्यनिवासमित्यस्यो पान्वध्याङ्वसइतिकर्मत्वं ॥ ४८ ॥

सनयासनया सनया सन या ह्यसुहृद्घटया
विपदं स्वपदं ॥ हितदे हितदेहि त देहित
देहित देत्य लप ब्दहुधा नरदेवसुता ॥ ४९ ॥

सनयेति हेहितदहितमीप्सितंवस्तुददातीतिहितदनलसत्वंसनयासन यानयोनीतिस्तस्याअसनंत्यागस्तत्सहितयात्यक्तनित्याअसुहृद्घटया शत्रुकरिसमूहेनविपदंनाशंनयाहिमागमः ईहितदेहिईहिताइष्टाउप कर्तारोदेहिनोजनायस्मिंस्तादृशंतत्स्वपदंस्वनगरमेहिआयाहि इत्य नेनप्रकारेणसनयानीतिसहितानरदेवसुताभीमभूपपुत्रीबहुधाबहुप्रका रंव्यलपद्विललाप यद्वा हितदेहितदेहीत्येकंपदंहितदंईहितंचेष्टितंये षांतेतादृशादेहिनोयत्रतत्स्वपदंराज्यमेहि हेनलएवमेकाकीशत्रूहस्तं मागच्छे शत्रवएकाकिनंत्वांदृष्ट्वाऽपकुर्युस्तस्मात्स्वकीयमेवनगरंग च्छेतिनानाशंकाकुलाभैमीतास्मिन्वनेविललापेतिभावः करिणांघ टनाघटायाप्रापणेऽस्यलोटियाहीति पदंव्यवासितत्राणस्थानलक्ष्म्यां घ्रिवस्तुषुएहीतीणोलोटि अलपदितिलपव्यक्तायांवाचीत्यस्यलङि बहुधासंख्यायाविधार्थेधा सप्तभिःकुलकम् ॥ ४९ ॥

सा विधुरा धावंतं रत्नौघं क्वा पि निरपरा
धावतं ॥ सार्थराधावंतं प्रैक्षिष्टा पद्म सुतनु
राधा वंतं ॥ ५० ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सेति विधुराविरहितासुतनुःशोभनांगीसादमयंतीनिरपराधाऽपराधर हिताक्कापिकस्मिन्नपिदेशेरत्नौघंरत्नसमूहंअवंतंरक्षंतंसरत्नमूहंराधावं तंराधासमृध्दिस्तत्साहितंधावंतंगच्छंतंसार्थंजनसमूहंप्रैक्षिष्टदृष्टवतो आधौमनः पीडायामंतमवसानंचप्रापल्लेभे वनेऽटंतीसार्थमासाद्यम नः पीडांजहात्विितिभावः धावुगतिशुध्द्योरित्यस्यधावंतामिति रा धसाधसंसिध्दावित्यस्याषिद्भिदादिभ्योऽङित्यङिराधेति प्रैक्षिष्टेतीक्ष दर्शनांकनयोरित्यस्यलङिआपेर्लुङिआपादिति संघसार्थौतुजंतुभिः पुंस्याधिर्मानसीव्यथा ॥ ५० ॥

व्याकुलये वारितया विधेर्गति रनेन सिद्ध्ये वारितया ॥ अपिच ययेवारितया यथा शफर्या जलोच्चयेवा रितया ॥ ५१ ॥

व्याकुलेतिविधेर्दैवस्यारितयाशत्रुत्वेनव्याकुलयाइवअत्रापिविधाताश त्रुरभूदितिउद्भ्रांतयेवतयादमयंत्यासिध्द्येनलान्वेषणरूपकार्यस्यभी मपुरप्राप्तयेवाअनेनसार्थेनसहगतिर्गमनमवारिभेजेवृतावा वारितया कात्वंकुत्रयासिइतिनिवारितयापिचययेगतम् कयायथा वारितयावाः जलमितयाप्राप्तयाशफर्याजलोच्चयेजलवृध्दौयथा जनोच्चयइतिपाठे जनसंघेतयाययेइत्यर्थः अवारितयाइत्यकारप्रश्लेषेअनिषिध्दयेत्यर्थः अवाः जलरहितंनिर्जलमितयाशफर्येव अहमपिभवत्संगेसमेष्या मीत्युक्त्वानिषिध्दयापिभैम्यागतमितिभावः भाग्यंस्त्रीनियतिर्विधिः वृञ्संभक्तावित्यस्यलुङिचिण्यवारिति याप्रापणेइत्यस्यभावेलिटि ययेवार्वारिसलिलंकमलंजलमित्यमरः अत्रेयंभारतवार्ता तत्रवने गच्छंतंवणिक्सार्थंसाददर्शतांचदृष्ट्वाःतेषांमध्येकाश्चित्शुचिनामाव णिक्कात्वंकस्यासिक्कयासिइत्याहततस्तयाभीतयास्ववृत्तांतंकथितं कुत्रापिभवद्भिर्नलोदृष्टइतिपृष्टाः नवयंनलंविद्मइत्यूचुः ततःकया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यथइत्युक्ताः सुबाहुनाम्नश्चेदिराजस्यदेशेवाणिज्यार्थंयास्यामःइत्यूचुः ततःतैःसार्द्धंसापिययौइति ॥ ५१ ॥

प्रतिषिद्धान्यायस्य प्रापि सुबाहो श्च रा
जधान्या यस्य ॥ बहुधनधान्या यस्य
प्रबभु र्वृन्दानि बहुविधा न्यायस्य ॥ ५२ ॥

प्रतीति आयस्यपदःगमनेनआयासंकृत्वा प्रतिषिद्धान्यायस्यप्रतिषिद्धोनिराकृतोऽन्यायोऽनीतिर्येनतादृशस्यसुबाहोः सुबाहुनाम्नोराज्ञः राजधानीनगरीप्रापिचप्राप्ताच कीदृशीबहुधनधान्यावहुतरंधनधान्यं यस्याः सायस्यसुबाहोः आयस्यधनागमस्यबहुविधानिनानाप्रकाराणिवृंदानिसमूहाः प्रबभुःरेजिरे एवंसार्थेनसहव्रजंत्याभैम्याआयासेनसुबाहुपुरीप्राप्तेतिभावः प्रापेत्यापेर्लुङिचिणि प्रबभुरितिभातेर्लिटि ॥ ५२ ॥

सच्छन्ना मात्रा सानंदंराज्ञो भृता च ना मा
त्रा सा ॥ शोकेना मात्रासा ववस त्धृतदे
हयापना मात्रा सा ॥ ५३ ॥

सच्छन्नेति असौदमयंती सच्छन्नावपुर्मालिन्यात्दमयंतीतिज्ञातुमशक्याराज्ञः सुबाहोर्मात्रासानंदंयथास्यादेवंभृतानामपोषितानामसंभावनायां अत्रसुबाह्वंतःपुरेअत्रासात्रासरहिताधृतदेहयापनामात्राधृतंदेहयापनाशरीरस्थितिमात्रंययासातादृशीदेहधारणार्थंभुक्तेनतुसौख्यार्थमितिभावः शोकेनअमाशोकसहितासाभैमीअवसत्वासमकरोत् यद्वा धृतादेहनिर्वाहमात्रेआशायेतिसाधृतदेहयापनामात्राशेत्येकंपदम् अत्रपक्षेयमकेशसयोरभेदोनदोषाय यमकश्लेषचित्रेषुरलयोर्डलयोर्नभित् नानुस्वारविसर्गौचचित्रभंगायसंमतौइतिवत् अ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौभैमीसुबाहुमात्राद्मयंतीत्यनभिज्ञायसानंदमपुषत्साचशरीररक्षा मात्राहाराभूदितिभावः अवसदितिवसेर्लङि अत्रेयंभारतवार्ता सायान्हेभैमीवणिग्भिःसार्धंसुबाहुनगरंप्राप्ता अथप्रासादस्थाराजमाता तांदृष्ट्वाधात्रीद्वारास्वसमीपमानीयकात्वमितिप्रोवाचततः दमयत्याः परिचारिकाहमितिभैम्याह राजमातोवाचअत्रतिष्ठततोभैमी निर्बंधंचकारपादसेवनमुच्छिष्टफेटननंनकरिष्यामीति ॥ ५३ ॥

पदा पदा परिभ्रम न्नयेन या प दापदा॥
वनावना वनाथव त्सजीवनावना भवत्॥ ५४॥

इतिश्रीकालिकृतेनलोदयेसत्काव्येतृतीयोच्छ्वासः ॥ ३ ॥

पदेति अपदाअत्राणाअस्थानावायादमयंतीनयेननतियाकृत्वाआपदाविपत्यापदाचरणेनवनावनौवनभूमौअनाथवत्परिभ्रमनूपर्यटनमापछेभे सासजीवनावनाजीवनंतस्यअवनंरक्षणंतत्सहितासजीवितरक्षाभवत् याभैमीविपदिचरणाभ्यांवनभूमौपर्यभ्रमीत्साजीवनरक्षणंप्रापेतिभावः पदंव्रिश्चरणोस्त्रियाम् आपदित्यापेर्लङि विपत्यांक्विपदापदौ अभवदितिभवतेर्लङि ॥ ५४ ॥

इतिश्रीनलोदयकाव्यटीकायांसुबोधिन्यांतृतीयोच्छ्वासः ॥ ३ ॥

अथ तुंगोपायस्य श्रवणेन नलस्य सानुगोपायस्य ॥ वशगा गोपा यस्य स्वमनो भीम श्चिरं जुगोपा यस्य ॥ १ ॥

अथेति अथानंतरंतुंगोपायस्यतुंगउन्नउपायः सामादिर्यस्यतादृशस्यनलस्यअपायस्यापक्रमणस्यदुःखस्यवाश्रवणेनसानुगः अनुगच्छंतीत्यनुगास्तैःसहितः सानुचरःचिरंबहुकालंआयस्यप्रयासंकृत्वान

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लान्वेषणायभीमःस्वमनः स्वस्यमानसंजुगोपरक्षितवान् यस्यभीमस्यगोपाः गांभूमिंपांतीतिगोपाः राजानः ग्रामौघाधिकारिणोवागोपजातीयावावशगाआयत्ताः नलापगमनंश्रुत्वातदन्वेषणार्थंबहुधाआयस्यशोकसहितंस्वहृत्कथंचिदरक्षत् गोपोगोपालकेगोष्ठाध्यक्षेपृथ्वीपतावपि ग्रामौघातिकृतेपुंसीतिमेदिनिकरः स्थायुकोधिकृतोग्रामेगोपोग्रामेभुपूरिषु इत्यमरश्च ॥ १ ॥

निशि च दिवा चा र्यस्य क्षतस्य नलविचिंत
ये ऽथवा चार्यस्य ॥ भृशमेवा चार्य स्य द्वि
जोत्तमैः शिष्यकै रिवा चार्यस्य ॥ २ ॥

निशीति अस्यभीमस्यवाचावचनेनद्विजोत्तमैर्ब्राह्मणश्रेष्ठैर्नलविचिंतयेनलान्वेषणायनिशिरात्रौचदिवाचदिवसेभृशमेवात्यर्थमेवअचारिनानादेशसंचरणमकारि कीदृशस्यास्य अर्यस्यक्षतस्यअरेःअसयः अर्यसयस्तैः शत्रुखड्गैरताडितस्य एवमार्यस्यश्रेष्ठस्यआचार्यस्यगुरोर्वचसाशिष्यकैरिवाशिष्यैरिवस्वार्थैकः शिष्यायथागुरोराज्ञयाऽहर्निशंसंचरंतितथेत्यर्थः ॥ २

अथ नयनेत्रा सादि प्रचुरा पूः केनचि द्विजने
त्रासादि ॥ यत्र सुनेत्रा सा दिग्भ्रमेण दुः
खं गता वने त्रासादि ॥ ३ ॥

अथेति अथानंतरंअत्रजनेविषयेकेनचिदनिर्वचनीयचतुरेणसुदेवनाम्नाद्विजेननयनेत्रानीतिनिपुणेनसादिप्रचुरासादिनोऽश्ववाराः प्रचुरायस्यांसापूःआसादीप्राप्ता साकायत्रपुरिसासुनेत्राभैमीवर्ततइतिशेषःकीदृशीसा वनेदिग्भ्रमेणदिग्भ्रांत्यात्रासादित्रासपूर्वकंदुःखंगताप्राप्तादिग्भ्रमेणेत्यत्रआदिक्रांत्याइतिपाठेयत्रपुरिआदिक्रांत्याप्रथमप्रवेशेनजनेलोकेत्रासादिभवतियत्रपुरिवनेदुःखंगतासासुनेत्राआसीदित्यर्थः ३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह दीना यततेन स्वगृहंच भैमी ययेऽमु
ना ऽयततेन ॥ स्वनयेऽना यततेन प्राप्त्यै स्वा
सो श्च शोभना यततेन ॥ ४ ॥

सहेति दीनादुःखिताभैमीतेनद्विजेनसहस्वगृहंआयत गतवती चेदि पुरीनिलयंब्राह्मणंगृहीत्वास्ववासस्थानेगतवतीआयततेनधनागम व्याप्तिनामुनाद्विजेनसहभैम्यायययेभीमगृहंप्रतीतिशेषः चेदिराजदत्तध नवताद्विजेनसहभैमीभीमगृहमगादितिभावः यद्वा नलान्वेषणा यभीमदत्तबहुधनवताविप्रेणभैम्यासहचेदिगृहंययेइत्यर्थः शोभनासा भैमीस्वनयेनस्वनीत्याअयततेनप्राप्त्यैअयःशुभाविधिःस्तेनततोव्याप्तो यइनःस्वामीनलस्तस्यप्राप्त्यैयततेस्मयत्नमकरोत्स्वासोः स्वकीयप्रा णस्यप्राप्त्यैनयततेस्म अत्रेयंभारतवार्तासुनंदांतःपुरेसमागतंसुदेवंब्रा ह्मणंदृष्ट्वादमयंतीरुरोद सुदेवउवाच अहंतवभ्रातुःसखासुदेवना माभीमवचनात्त्वामन्वेष्टुमागतः तवबांधवास्त्वांविनामृताइवतिष्ठं तिततोराजमातरंसर्ववृत्तांतमकथयत् सुबाहुमाताचनलपत्नींदमयं तींज्ञात्वाआलिंग्यसांत्वयामाससुनंदातुनिश्चयार्थंतस्यागात्रमलंदूरी कृत्यशिरस्यर्धचंद्राकारंजरुडलाच्छनंददर्शतच्चिन्हेनसुदृढंज्ञात्वाम मभगिन्याः कन्यात्वंइत्युक्काराजमातातामलंकृत्यामात्यैःसुदेवेन चसहितांदमयंतींपितृगेहंप्रापयत् तत्रसापुत्रादिभिःसहयुयोज भीम श्चसुदेवायपुनःपुनःप्रणामंकृत्वाबहुधनानिददौ ततोनलान्वेषणार्थं पुनर्ब्राह्मणान् प्रेषयामासइति ॥ ४ ॥

वसनांशस्य स्तेन का ऽसि ममा ऽयं विधिः
यंशस्य स्ते न ॥ छद्म विशस्य स्तेन स्वजनेन
भृतेन भवसि शस्य स्तेन ॥ ५ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नयमेवाह वसनेति हेवसनांशस्य वस्त्रखंडस्यस्तेन चौरनलखंक्षा सिदमयंत्याअयंविधिः वनगमनादिस्तेयशस्योनयशसेनहेप्रियअ स्तेनत्यक्तेनस्वजनेनस्वबंधुनाकृत्वाछद्मकपटंविशसिप्राप्नोषि भृतेन पालितेनतेनस्वजननेनशस्यःस्तुत्योभवसि स्वबंधुपालनेनकीर्तेरुय स्तत्तुत्वयानकृतमितिभावः ॥ ५ ॥

सजन स्तेना गादिक्रामी ति जनेन तन्मते
ना ऽगादि ॥ भर्तृकृते नागादिस्यदेन भुवि
वस्तुऽपरिहृतेना ऽगादि ॥ ६ ॥

सजनेति अगादिक्रामीपर्वतादिक्रमणशीलःसजनःप्रैष्यजनःभर्तृ कृतेनलार्थैतन्मतेनभैम्याज्ञप्तेनकेनचिदंतःपुरचारिणाजनेनइतिपूर्वो क्तश्लोकोक्तिप्रकारेणागादिउक्तः तथाचअस्यपूर्वोक्तश्लोकस्यार्थंज्ञा त्वोत्तरंयोददातितदागत्यकथयेत्युक्तः ततस्तेनजनेनप्रेस्यलोकेन नागादिस्यदेननागंसर्पमत्तीतिनागादीगरुडस्तद्वत्स्यदोवेगोयस्यते नवस्तुपरिहृतेननागरीयवस्तुत्यक्तवताछद्मचारिणाइत्यर्थः भुविभू मौअगादिपूर्वोक्तश्लोकस्यकोऽर्थइतिअवादि सप्रेष्यलोकोदमयंत्य नुमतेनकेनाप्यंतःपुरचारिणोक्तः एतदभिज्ञानेनलस्येतिदमयंत्यैव ग्राहितसंज्ञःनलान्वेषणायश्लोकर्थंपृच्छन् पर्यचारीदितिभावः रंह स्तरसीतुरयस्यदः शैलवृक्षौनगावगौ ॥ ६ ॥

को ऽप्यू चे तनयायाः पद मेत्य नृपस्य
तेषु चे तनयायाः ॥ भी मुंचेत नयाया
दार्ति स्त्व दुःसहाच चेतनया या ॥ ७ ॥

कोप्यूचइति तेष्वन्वेषकेषुमध्येकोप्यन्वेषकजनःइतनयायाः इतः प्राप्तोज्ञातोवानयोययाताद्दश्याःज्ञातनीतेर्नृपस्यभीमस्यतनयायाःप दंस्थानमेत्यऊचेउक्तवान् हेमदयतित्वांभीर्भयंमुंचेत्त्यजेत् अर्ति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पीडाचनयायान्नगच्छेत् भयमर्तिश्चनभविष्यतीतियावत् याअर्तिः चेतनयाबुध्यादुःसहासोढुमशक्या हेदमयंतित्वांभयंपीडाचहास्यतिनलोमयानलक्षितइत्यवोचदितिभावः पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु भीतिर्भीःसाध्वसंभयं मुचॢमोक्षणइत्यस्यात्मनेपदेशेमुचादीनामितिनुमिमुंचेतेतिरूपम् मतिर्मनीषाबुध्धिर्धीर्धिषणाज्ञप्तिचेतनेइतिहेमचंद्रः अर्तिः पीडाधनुकोटयोरित्यमरः ॥ ७ ॥

निजधामेतं समया मृतुपर्णं श्रावितो ऽर्थ
मेतं समया ॥ सचिवसमेतं समया गिरो
त्तरं ना जनिष्ट मेतं समया ॥ ८ ॥

निजेति हेमदयंतिनिजधामेतंनिजस्थानमयोध्यातत्रेतंतत्रस्थितंअयोध्याधिशंऋतुपर्णंऋतुपर्णनामानंराजानंसमयांसमागतः सचमया एनंअर्थंवसनस्तैन्यादिरूपमर्थवाच्यंसमयासश्रीक्रयासमयाअनतिनिम्नोन्नतयागिरावाचाश्रावितः सचिवसमेतंमंत्रिसमेतंतथामेतंमांलक्ष्मींइतंप्राप्तंऋतुपर्णंसमयामंत्रिसहितस्यऋतुपर्णस्यसमीपेउत्तरंप्रतिवाक्यंनाजनिष्टनजातम् हेभैमिवसनस्तेयादिकंत्वदुक्तंश्रावितऋतुपर्णः मंत्रिसहितस्यतस्यसमीपेउत्तरंचनावाप्तमितिभावः अभितः परितःसमयेतिद्वितीया ऋतुपर्णमिति मंत्रीधीसचिवोऽमात्यःसमयामितियातेर्लिडि समयांतिकमध्ययोरितिमेदिनिकरः अजनिष्टेतिदीपजनेत्यादिनाचिण्तद्विकल्पेरूपम् ॥ ८ ॥

दीना ऽनायतनस्थो नानायतनक्षमो ऽस्य
सौत्ये ऽधिकृतः ॥ ना ना ऽयतनकरो लीना
नायत नः पथ्यु वा चा थ रहः ॥ ९ ॥

दीनेति अथानंतरमस्यऋतुपर्णस्यायतनंगृहंतत्रस्थितःसौत्येसारथ्येऽधिकृतः अनायतनकरःनआयतोदीर्घः करोहस्तोयस्यताद्दशःकुब्जो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नापुरुषःपथिलीनान्मार्गेलग्नानूगच्छतः नोऽस्मानूदीनादुःखितानू रहः विविक्तेआयतआगतवानूइतिउत्तरश्लोकेवक्ष्यमाणंचउवाच अवादीत् कीदृशः नानायतनक्षमःनानाप्रयत्नसमर्थःत्वदुक्तंश्रावयित्वाऽप्राप्तोत्तरान्मार्गेगच्छतोस्मान्संकुचितकरस्तत्सूतोरहसिएत्येदमुवाचेतिभावः गुणवचनब्राह्मणादिभ्यःकर्मणिचेतिष्यञिसौत्यः सूतस्त्वष्टरिसारथौ आयतेत्ययगताविव्त्यस्यलङि मंगलानंतरारंभप्रश्नकात्स्न्यैष्वथोअथरहौंतिकमुपव्हरे यद्वा दीनानायतनस्थइतिनलविशेषणंदीनश्चासौअनायतनस्थः असम्यगायतनस्थश्चेतितादृश इत्यर्थः ॥ ९ ॥

दीनाया ऽनायतया विवाससे ऽस्मै विहीनयानाय तया ॥ न खलु धिया ऽनायतया क्रोद्धव्यं धर्मनिश्चया ना यत या ॥ १० ॥

आगत्यकिमुवाचेत्याह दीनेति दीनायदुःखितायअनायतयाआयोधनागमः नआयोयस्यासावनायस्तद्भावस्तत्तातयाधनागमरहितत्वेन विवाससेवस्त्रहीनायतस्मैवसनस्तेनाय एवंविहीनंत्यक्तंयानंयेनतादृशाय अनायतयाअदीर्घतयाअविचारपूर्विकयाधियाबुध्यातयादमयंत्यानक्रोद्धव्यंक्रोधोनकर्तव्यः खल्वनुनये तयाकयायाधर्मनिश्चयानूधर्मनिर्णयानयतगतवतीयातिधार्मिकी धनागमरहितत्वेनदीनायवसनहीनायचतस्मैनलायतयादमयंत्याक्रोधोनकरणीयः दैववशादेतत्सर्वमभूदितिभावः क्रुधद्रुहेर्ष्यासूयार्थनायांयंप्रतिकोप इतिसंप्रदानत्वाच्चतुर्थीअस्मैइति आयतेत्ययगताविव्स्यलङि ॥ १० ॥

कृतकर्मा ऽनेन त्वा गतो ऽस्मि वचसे ति तस्य मानेन त्वा ॥ वेदयमाने नत्वा विप्रे च धनेषु दीयमानेनत्वा ॥ ११ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतेति प्रेष्यद्विजआह हेदमयंतिमानेनप्रमाणेनसत्येनतस्यपुरुषस्यअ नेनवचसावचनेनकृतकर्मा कृतकार्योहं त्वात्वांप्रत्यागतोस्मिइति वेदयमानेबोधयतिद्विजेब्राह्मणेनत्वानमस्कृत्यधनेषुदीयमानेनत्वादी यमानमिनत्वंस्वामित्वंययाताद्दशी धनेषुदत्तस्वामित्वासासीदित्य र्थः अहंतस्यपुरुषस्यसत्येनवचसाकृतकृत्यस्त्वत्समीपमागतइतिव दतिविप्रेनमस्कृत्यबहुधनस्वामित्वमकार्षीदित्यर्थः इनःसूर्येप्रभौरा ज्ञि अत्रेयंपुराणवार्ता दमयंतीचनानास्तुतिंकृत्वापर्णादनामानंब्राह्म णंऋतुपर्णराजसारथिनिकटेश्लोकचतुष्टयंदत्वाप्रेषयामास सचतत्र गत्वातस्मैश्लोकानूददौ श्लोकायथा क्वनुत्वंकैतवैच्छित्वावस्त्रार्द्धं प्रस्थितोमम ॥ उत्सृज्यविपिनेसुप्तामनुरक्तांप्रियांप्रिय ॥ १ ॥ सावै यथासमादिष्टातथास्तेत्वत्प्रतीक्षिणी ॥ दह्यमानाभृशंबालावस्त्रार्द्धेना भिसंवृता ॥२॥ अस्यारुदंत्याःसततंतेनशोकेनपार्थिव ॥ प्रसादंकु वैवीरप्रतिवाक्यंददस्वच ॥ ३ ॥ माकुरुष्वप्राणनाथविफलंजीवनंम म ॥ यदितिष्ठन्नवक्तासिस्त्रीहत्यात्त्वामभिस्पृशेत् ॥ ४ ॥ इतिपर्णाद ब्राह्मणाद्वृत्तांतंश्रुत्वानलोवाचक्वनुसाक्षुत्पिपासार्ताश्रांताशेतेतपस्वि नी॥स्मरंतीतस्यमंदस्यकंवासाद्योपतिष्ठते॥ इतिकथयित्वाश्लोकपं चकंप्रस्थापयामास यथा वैधव्यमपिसंप्राप्यगोपयंतिकुलस्त्रियः ॥ आत्मानमात्मनासद्योजितःस्वर्गोनसंशयः ॥ १ ॥ रहिताभर्तृभिः सद्योनक्रुध्यंतिकदाचन ॥ प्राणांश्चारित्रकवचान्धारयंतिकुलस्त्रि यः ॥ २ ॥ विषमस्थेनमूढेनपरिभ्रष्टसुखेनच ॥ यत्सातेनपरित्य क्तानतत्रक्रोद्धुमर्हसि ॥ ३ ॥ प्राणयात्रांपरिप्रेप्सोःशकुनैर्हृतवास सः ॥ आधिभिर्हन्यमानस्यनश्यामाक्रोद्धुमर्हसि ॥ ४ ॥ सत्कृता सत्कृतावापिपतिंद्दष्ट्वायथागतम् ॥ राज्यभ्रष्टंश्रियाहीनंनश्यामाक्रो द्धुमर्हसि ॥ ५ ॥ इतिश्लोकपंचकंनीत्वाआगत्यदमयंतींश्रावयामा सपर्णादइति ॥ ११ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्रा ऽपर्णाय ततस्वनया द्वैमी तपस्य पर्णा
यतत ॥ तुलितसुपर्णाय तत स्तस्या गमनाय
सर्तुपर्णाय ततः ॥ १२ ॥

तत्रेति ततस्तदनंतरंतत्रतस्मिन्कालेततोऽयोध्यायाः पंचम्यास्तासिल्सर्तुपर्णायऋतुपर्णसहितायतस्यनलस्यापर्णायअपगतमृणंयस्मिस्ताद्दशायनलप्रेरितहयानामेकदिवसेनबहुयोजनाध्वलंवनादृणापगमः तुलितः सुपर्णोगरुडोयेनताद्दशायआगमनायतपसिशरीरसंतापलक्षणेएकभक्तोपवासादौअपर्णापार्वतीइवभैमीदमयंतीततस्वनयात् ततोविस्तृतोयः स्वनयः स्वनीतिस्तस्मादयततयत्नंसमास्थिततदनंतरंदमयंतीबहुविशालस्वनीतिरयोध्यातोनलस्यसर्तुपर्णस्यागमनाययत्नंकृतवतीतिभावःस्याद्दणंपर्युदंचनम् ऋणमाधमर्ण्यइतिनिपातः यतीप्रयत्नइत्यस्यलाङि ॥ १२ ॥

सा कृतसामा ऽन्येन श्रावितवत्य मु मन
न्यसामान्येन ॥ स्वं रहसा मान्येन स्व
यंवरं स्मरति नां जसा मान्येनः ॥ १३ ॥

साकृतेति कृतसामाकृतंसामसांत्वंययाताद्दशीसाऽनन्यसामान्येनअन्यासाधारणेन अन्येनापरेणमान्येनपूज्येनविप्रेणामुमृतुपर्णंरहसाएकांतेनस्वंस्वकीयंस्वयंवरंश्रावितवतीअशिश्रवत् पूर्वपरिणीतापरिणयनांतरंकर्तुंकथंप्रवर्ततेतत्राह मानीअभिमानीअंजसाझटितिएनःपापंनस्मरति सादमयंतीअन्येनकेनापिद्विजेनस्वंस्वयंवरसुपन्हरेऋतुपर्णंश्रावितवती यतोमानीझटितिपापंनस्मरति ऋतुपर्णःस्वयंवरंश्रुत्वाशीघ्रमेष्यतितेनसहनलोप्यागमिष्यतीतिभावः स्राग्झटित्यंजसांन्हायद्राक्मंक्षुसपदिद्रुते स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्त्रियांधनेइत्यमरः अत्रेयंपुराणवार्त्ता दमयंतीमातरमुवाचसुदेवोया तुऋतुपर्णं वदतुभैमिपुनः स्वयंवरंकरिष्यतिसतुश्वोभावीयदिद्रष्टुमिच्छातदागच्छतत्श्रुत्वातन्मातातथाकरोत् ऋतुपर्णोऽपिसुदेवात्तच्छ्रुत्वागमनंनिश्चित्यनलेनपरामृषतइति ॥ १३ ॥

रहसि तदा सन्नाहस्थित स्म स नलं युतो
मुदा सन्नाह ॥ श्रीस्तु मदासन्ना ह स्फुटं
प्रयामो व्रजे दिति न्युदास न्नाहः ॥ १४ ॥

रहसीति तदासुदेवात् स्वयंवरवृत्तांतश्रवणकालेसऋतुपर्णः सन्नाहस्थितःसन्नाहेकवचेस्थितः बद्धकवचः मुदाहर्षेणयुतः रहसिएकांतेनलंइतिआहउवाचइतीतिकिंहेसन्पूज्यअहः दिनंन्युदासंनाशंव्रजेत् नगच्छेत्वयंदमयंतीपुनः स्वयंवरेस्फुटंप्रव्यक्तं प्रयामोगच्छामः श्रीस्तुलक्ष्मीस्तुदमयंतीलाभात्तद्रूपावामदासन्नामदंति कगता भवेत् हसंबोधने हरसीत्यत्रहरसीतिपाठेत्वंहरसीचेद्दहसिचेत्तदास्फुटंप्रयामइत्यर्थः क्वचित्तुद्वितीयचरणेस्मरयुतोनलंमुदासन्नाहइति पाठस्तत्रस्मरयुतः सन्कामार्तः सन्मुदाहर्षेणनलंआहइत्यर्थः हेनलमांचेत्धरसितदाद्यप्रयामोभीमपुरंदिवसोननाशंव्रजेत् अद्यैवमांनय दमयंतीवरितुंगंतव्यमेवेतिभावः असगतावित्यस्यानेकार्थत्वात् हरसिहञोलटि व्रजेत्व्रजेर्लिङि समीपेसमयासन्नसन्निकृष्टसनीडवत् ॥ १४ ॥

सा वनिता वध्वा नः स्वगुणैः कर्षति के
हताश्ववध्वा न ॥ समह स्ताव ध्वानः
श्व इति योजनशतांमिता वध्वा नः ॥ १५ ॥

सेति सावनिताभैमीस्वगुणैरात्मगुणैर्वध्वासंयम्यनोऽस्मान्कर्षति यमकेववयोरैक्यंनदोषाय डलयोरलयोश्चैवशसयोर्ववयोस्तथा वदं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्येषांद्विसावर्ण्यमलंकारविदोजनाः इत्यालंकारिकवचनात् चपु नर्वध्वाख्रियाकेनहृताः अपितुसर्वएवहृताइतिभावः समहस्ताव त्स्वयंवरोत्सवः तावत्श्वःआगामिदिवसेइत्यनेनप्रकारेणध्वानः लोकध्वनिःलोकवार्तास्तीतियावत् नःअस्माकंअध्वामार्गःयोजन शतंमितोप्रमाणेवर्तते हेबाहुकभैमीस्वयंवरः श्वोभवितेतिलोकवा र्ताअस्माकंमार्गः शतयोजनमितः अतःशीघ्रंरथंसज्जीकुरुइतिभावः नारीसीमंतिनीवधूः वधबंधनइत्यस्मात् स्कावत्स्वेति कृषविलेखन इत्यस्माद्धौवादिकाल्लटिकर्षतीति महउत्सवउत्सवः ह्योगतेऽनागते न्हिश्वःपरश्वस्तुपरेद्यवि अयनंवर्त्ममार्गाध्वपंथानइत्ययरः ॥ १५॥

त त्वरया ऽमा यामः प्रणये यदि मा ऽनि
तत्रियामायामः ॥ नलजायामाया मस्मृत्वे
त्यूचे क्व दुर्धिया मायामः ॥ १६ ॥

तत्वरेति हेसूततत्तस्मात्अनितत्रियामायामः अनितोऽप्राप्तः त्रिया मायारात्र्यायामः प्रहरोयेनताद्दृक्त्वंत्वरयासंभ्रमेणमामांयदिप्रणयेर्नय सितदाअमासमीपंसहवायामोगच्छामइति अनेनप्रकारेणनलजा यामायांनलजायायादमयंत्याः मायांव्याजमस्मृत्वाअविचिंत्यऊचे यतोदुर्धियांदुष्टाःकामक्रोधवशाक्रांताश्चताधियश्चेतितासांदुष्टबुद्धीना मायामोदैर्घ्यंविचारपरंपराक्वकुत्र अपितुकुत्रापिन अथवादुष्टाः धियो येषांतेताद्दृशानांपुंसामायामोविचारदैर्घ्यंक्व क्वचित्तुदुर्धियामित्यत्रयु वधियामितिपाठःतत्रयूनांतरुणानांधियांबुद्धीनांक्वआयामोदैर्घ्यंअ पितुक्वापिनेत्यर्थः रात्रिप्रहरमध्येमांयदिनयसितदाभैमीस्वयंवरंव्रजा मीत्युक्तवान् दमयंतीव्याजमजानानएवेतिभावः दैर्घ्यमायामआना हः अस्मदोद्वयोश्चेत्येकत्वेबहुवचनंसंभ्रमस्त्वरा अमासहसमीपेच प्रणयेरितिणिजोलिङि मात्वामौद्वितीयायाइतिमादेशः ॥ १६॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युग्मकं ॥ मां भजमाना श्वः स्या न्नून मसौ
तत्प्रचोद्यमानाश्वःस्यां ॥ इति मतिमाना श्वस्या
न्यायय मनाशंक्य विकृतिमाना श्व स्यां ॥ १७॥

मामिति आदिकुलकंतत्प्रचोद्यमानाश्वःतेनबाहुकेनप्रचोद्यमानाःप्रे
र्यमाणाअश्वायस्यएतादृक्चेत्स्यांभवेयंतदाऽसौदमयंतीश्वोनूनंनि
श्चयेनमांभजमानाआश्रयंतीस्यादितिमतिमानेवंबुद्धिसहितः सऋतु
पर्णःअस्यांदमयंत्यामन्यायंपररुयाभिलाषलक्षणमनाशंक्यआश्वस्य
आश्वासंप्राप्यआशुशीघ्रंविकृतिमांमानोविकारवानित्यूचेइतिपूर्व
श्लोकेनान्वयः यद्यसौमांनयतितर्हिश्वःसामांवृणीतेतिपररुयाभिला
षमबुध्वाविकारवान्नलंतथोवाचेतिभावः नूनंतर्केऽर्थनिश्चये यद्वा म
तिमान्नलः मनसिआश्वस्यस्वयंवरवार्त्तांश्रुत्वाउत्पन्नकोपंविचारे
णशमयित्वा अस्यांदमयंत्यामन्यायमनाशंक्यअमत्वाचेत्यादिप्रचो
द्यमानाश्वः स्यांतदाअसौदमयंतीश्वःप्रातःकालेभजमानास्यात्इति
हेतोः आशुशीघ्रंविकृतिमान्रोमांचितः स्यात्बभूवेत्यर्थः ॥ १७ ॥

अथ रथ मारावंतं शस्त्राणि नलः शुभाश्व
मारा वंतं ॥ स जगामा ऽरा ऽवंतं नृपति मा-
रोप्य च गुरुतमारावं तं ॥ १८ ॥

अथेति अथवचनानंतरंनलः आरावंतंआसमंतात्अरंशीघ्रगंअवं
तम् यद्वा अरनंआरःशीघ्रगतिःतंअवंतंरक्षंतं यद्वा आसमंतात्
अरंशीघ्रंअवंतंगच्छंतं यद्वा अस्यविष्णोःअरंचक्रंआरंतमिवअवंतं
गच्छंतंअतिशीघ्रगमित्यर्थः तंशस्त्राण्यायुधानिअवंतंरक्षंतंशुभाश्व
शोभनाअश्वायस्मिंतादृशंगुरुतमः गरिष्टतमआरावःशब्दोयस्यता
दृशंरथंआरगतवान्चपुनः अरौशत्रौअंतन्नाशकंतंनरेंद्रमृतुपर्णरथमा
रोप्यारोप्याजगामभीमनगरंगतवान् ऋतुपर्णवचनोत्तरमृतुपर्णरथमा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रोप्यकुंडिननगरमनयादिभिभावः जगामेतिगमेर्लिटि अंतोध्यव सितिमृत्योस्वरूपेनिश्चयेंऽतिके अरंशीघ्रेचचक्रांगेशीघ्रगेपुनरंन्यव तृइतिमेदिनिकरः ॥ १८ ॥

स्वांसकृतावसनस्य क्षणदूरत्वेन संगता
वसनस्य ॥ भूभर्त्ता वसनस्य व्यस्मयत
रथद्रुते धुंता वसनस्य॥ १९ ॥

स्वांसेति भूभर्त्ताऋतुपर्णःस्वांसकृतावसनस्यस्वस्यांसेस्कंधेकृतमा वसनमाछादनंयेनताद्दशस्यवसनस्यरथद्रुतेः रथवेगादुत्पन्नस्यअसन स्यवायोर्धुतौकंपेसतिअसनस्यासनवृक्षस्यसंगतौसंगमेक्षणदूरत्वेन क्षणादेवबहुयोजनांतरितत्वेनव्यस्मयताविस्मितोबभूव नलप्रेरितर थवेगवशोद्भवमरुद्धूतोतरीयस्यक्षणदूरत्त्वादृतुपर्णोद्भुतायमानमनाअ भूदितिभावः स्कंधोभुजशिरोंसोस्त्रीत्यमरः अस्यतीत्यसनोवायुःस मीरपर्यायः यद्वा स्वांसकृतावसनस्येत्यस्यस्वांसिस्वस्कंधेकृतंअवस नंअस्थितिर्येनतस्यरथवेगोद्भूतवायुनोडीयमानस्येत्यर्थः अत्रेयंपुरा णवार्त्ता स्वांसादुत्तरीयेभ्रष्टेराजाबाहूकमुवाच अश्वान्संयच्छवार्ष्णे यनामाऽपरसारथिःउत्तरीयमानयतु बाहुकउवाच बहुयोजनांतरितं तदतोनानेतुंशक्यामिति ॥ १९ ॥

फलगणना दक्षस्य व्यधित तदा सोश्वनोदना
दक्षस्य ॥ तपासि च ना दक्षस्य प्रहर्षणं
त्वृदय बोध नादक्षस्य ॥ २० ॥

फलेति सनापुरुषऋतुपणः अक्षस्यद्यूतस्यहृदयबोधनाद्धृदयज्ञानाद्धे तोरक्षस्यकलिद्रुमस्यफलगणानात्फलपरिसंख्यानादश्वनोदक्षस्यअ श्वानांनोदनाबाहनंतत्रदक्षस्यचतुरस्यतपसिचतपोविषयेदक्षस्यदक्ष प्रजापतिसदृशस्यनलस्यप्रहर्षणामाल्हादनंव्यधितचक्रेयतोयंराजाफ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लगणानादक्षः अतःपाशकगणनाकोविदोपिस्यात् एतांविद्यांनीत्वापुनर्जेष्यामीतिकृत्वानलस्यमहाहर्षोभूदितिपर्यवसितार्थः सऋतुर्णोविभीतकफलस्येयत्ताकथनादश्वहृदयज्ञस्यनलस्यप्रहर्षणंमनअल्हादयांचकारेतिभावः त्रिलिंगंस्तुविभीतकः अक्षस्तुषःकर्षफलोभूतावासः कलिद्रुमः व्याधितेतिधात्रोलुङिःस्थाघ्वो रिच्चेतीत्वे-ह्रस्वादितिसिज्लोपरूपं अत्रेयंपुराणवार्ता ऋतुपर्णोविभीतकवृक्षंदृष्ट्वाबाहुकमुवाच ममात्रगणनाकौशलंपश्यआस्मिन् वृक्षेपतितंपत्रमेकधिकाशतंफलंच तावदेवपतितंस्थितानिपत्राणिपंचकोटयःफलानिद्वेसहस्रे बाहुकउवाच वार्ष्णेयरश्मीन्संयच्छअहंराजगणितंगणायिष्यामिततोनलस्तद्गणयित्वाआहअत्यद्भुतमिदंइमांविद्यांमह्यंदेहिमत्तोऽश्वहृदयविद्यांगृहाणइतिपरिवर्तितम् तदाह ॥ २० ॥

बलजितदेवार्याभ्यां विद्याविनिमयो युगपदे वा
र्याभ्यां ॥ संमर्दे ऽवार्याभ्यांव्यधायि संस्पृश्य
संप देवा र्याभ्यां ॥ २१ ॥

बलेति अथरथवेगफलगणनकौतुकदर्शनानंतरंबलजितदेवार्याभ्यांबलेनसामर्थ्येनजितःपराजितोदेवार्यः देवस्वामीद्रोयाभ्यांतादृग्भ्यामाभ्यांनलर्तुपर्णाभ्यांसंमर्द्दरणेऽअवार्याभ्यांनिवारयितुमशक्याभ्यांयुगपदेवएकवारमेववारिजलंसंस्पृश्यसंपदोश्रियेविद्याविनिमयोविधापरिवर्तनंव्यधायिविहितः अथनलर्तुपर्णौरथादवतीर्यआचम्यविद्यागृहणंपरस्परंचक्रुरितिभावः व्यधायीति धात्रोलुङिचिणिआतोयुक्चिण्कृतोरितियकिसातिरूपम् ॥ २१ ॥

तदनु द्रुत मक्षमतः स्वीकृत्य स्वदहने ऽधि
कतमक्षमतः ॥ कालि रुन्नत मक्ष मतः स्फुट
मेव गतो नल स्तु न त मक्षमत ॥ २२ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदिति तदनुततःपश्चात्स्फुटंप्रव्यक्तंअस्वदहनेकलिदहनेऽधिकतम क्षमतःअत्यंतसमर्थात् अतोऽस्मात्नलसकाशात्कलिर्द्रुतमेवउन्नतंउ चैस्तरंअक्षंबिभीतकवृक्षंश्रितःप्राप्तः तुपुनःनलःअतःऋतुपर्णादक्षं स्वीकृत्यअक्षज्ञानंप्राप्यतंकलिंनअक्षमतनाविषेहे ऋतुपर्णादक्षहृदयं प्राप्यकलियावद्भस्मसात्करोतितावन्नलाद्विनिर्गत्यबिभीतकतरुम शिश्रयत् नलस्तुतस्मैचुकोपेतिभावः पश्चात्साद्दश्योरनु लघुक्षिप्र मरंद्रुतंम् अक्षमतेति क्षमुष्सहनेऽस्माल्लङि ॥ २२ ॥

पतित मनलसमेतस्याभैम्या ऋषि विद्धि मा
नलसमेतस्याः ॥ आर्त्यनलसमेतस्या श्रित
स्य शरणप्रदो नल स मे ऽतः स्याः ॥ २३ ॥

पतितमिति कलिर्नलमाह हेनलएतस्यास्तवत्हृदयेविद्यमानायास्त स्याभैम्याअनलसमेऽग्निसदृशेरुषिरोषेपतितमतएवालसंदुःखितंमां विद्धिजानीहिआर्त्यनलसमेतस्यआसमंताद्याआर्तिःपीडासैवानल स्तत्समेतस्यसंयुक्तस्यआर्तिबलसमेतस्येतिपाठेआर्तेःपीडायाबलेन आधिक्येनसमेतस्येत्यर्थः मेममआश्रितस्यआश्रयवतःअतःदमयंती क्रोधातशरणप्रदःप्राणत्राणदातासत्वंस्याः भवेःआःपीडायांदमयंती रोषाग्निनादह्यमानंमांप्रतिकिंरोषंकरोषिभैमीकोपज्वलितस्यमेशरणं भवेतिभावःआस्तुस्याक्रोधपीडयोःआर्तिःपीडाधनुःकोटयोः ॥ २३

कलि मिति नानामा यं नमंत ममुंच न्महाम
ना नामायं ॥ कीर्तिधनानामायं सदधातिह
रंति रिपुजनानामायं ॥ २४ ॥

कलीति इत्यनेनप्रकारेणनमंतंप्रणमंतंनानामायंनानाव्याजंकलिंम हामनामहाशयोयंनलोऽमुंचत्यक्तवान्नामसंभावनायाम् यंपुरुषंरिपुज

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नानामाःशत्रुजननमस्काराः हरंतिआकर्षंतिसपुमानन्कीर्तिधनानां यशोलक्षणद्रविणानामायंदधातिधारयतिएवंबहुधानमस्कुर्वन्तूतंकलिं कारुणिकतयाऽत्यजत् यतः शत्रुनतयोयंवशयातिसयशोधनवान् भवतीतिमुचॢमोक्षणइत्येतस्यलङिअमुंचदिति नामप्रकाश्यसंभाव्य क्राघोपगमकुत्सनेअत्रेयंभारतवार्ता अक्षहृदयंगृहीतवतोनलस्यदेहात्कर्कोटकनागविषंवमन् कलिर्निःसृतःतंकलिंनलः शप्तुमुद्यतःततोऽतिभीतः कलिर्नलमुवाचत्वंमेशरणंभवमाशपस्वयेजनास्त्वांकीर्तयिष्यंतितेषांमत्तोनभयंभवेत् अहममुंबिभीतकवृक्षंप्रविशामिततः कारणात् नलस्तंअक्षमतस्ततोबिभीतकवृक्षंसंप्रविवेशततः प्रभृतिबिभीतकवृक्षच्छायापिनगृह्यतेइति ॥ २४ ॥

युग्मकं ॥ अथ नुन्नाश्इव स्तेन प्रास्थित राजा
महाना इव स्ते न ॥ सा ललना इव स्तेन स्या
दिति हसता विरोधिना ऽश्व स्तेन ॥ २५ ॥

अथेति अथकलिगमनांतरंविरोधिनाकलिनाशत्रुणाआशुशीघ्रंअस्तेनत्यक्तेनआश्वस्तेनविश्रांतवतादुःखाद्वाआश्वस्तेनआश्वासंप्राप्तवतामहात्मनामहाप्रभावेण साललनाभैमीइवआगामिदिनेतेतवकिन्नस्यादपितुस्यादेवेतिव्याजेनसातवस्त्रीनस्यान्नभविष्यतीतिमनसिकृत्यहसतातेननलेननुन्नाश्वःप्रेरितहयःसराजाऋतुपर्णःप्रास्थितप्रचचालेतियावत् विद्योपदेशस्थानात् शेषमार्गमवगाहतेतिभावः नुन्ननुत्तास्तनिष्ठ्यूताविद्धक्षिप्तप्रेरिताःसमाः समवप्रविभ्यःस्थइत्यात्मनेपदेस्थाध्वोरिच्चेतीत्वेसिचोलोपेलङिरूपंप्रास्थितेति उपसर्गेणधात्वर्थोबलादन्यत्रनीयतइतिस्थित्यर्थस्यप्रपूर्वत्वेतद्विरुद्धार्थत्वं ह्योगतेऽनागतेन्हिश्वइत्यमरः ॥ २५ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सो ऽय ऽमनेना यतता मिष्ट इति नलः स
मं त्व नेनायततां ॥ वहति दिने नायततां
पुरीं प्रियेणाश्रितां जनेना यत तां ॥ २६ ॥

सोयमनेनेति अयंकलिमुक्तोऽनेनानिष्पापेनलःयततांयतीनांइष्टःव
ल्लभः यद्वा इष्टेऽभीप्सितेदमयंतीदर्शनेयततांयत्नंकरोतुइतिहेतोर्दिने
दिवसेऽनायततामदीर्घतांवहतिसातिधारयतिसतिसनलो ऽनेनऋतुप
र्णेनसमंसहआयततांवनागमव्याप्तांप्रियेणजनेनदमयंत्याश्रितातांपुरीं
कुंडिनाख्यांआयतआगच्छत् अगतगतवान् कलिमुक्तोनलोभैमीं
पश्यत्विवितीवसकरुणेदिनेऽस्तंगच्छतिसतिऋतुपर्णेनसहनलःकुंडिनपु
रंप्रविवेशेतिभावःअयतेत्ययगतावित्यस्यलङि दैर्घ्यमायामः वहप्रा
पणइत्यस्यशतरिरूपंवहतीति ॥ २६ ॥

कर्तुं मानं ते न श्रम इति नीतो भुवो ऽय
ऽमानंते नः ॥ स्वं धामा ऽनंतेन प्रेम्णा भी-
मेन जितविमानं तेन ॥ २७॥

कर्तुमिति तेनभीमभूपेनतेतवश्रमोमार्गोद्भवपरिश्रमोनाभूदित्युक्त्वा
स्वागतमाभाष्यआनंताकृतनतिर्दर्शितनम्रत्वोयंभुवः भूमेरिनःप्रभुऋ
तुपर्णोमानंपूजांसंमानंवाकर्तुंविधातुंजितविमानंजितानिविमानानि
व्योमयानानियेनताद्दृशंस्वंस्वकीयंधामगृहं अनंतेनबहुतरेणप्रेम्णा
स्नेहेनानीतः प्रापितः तदनंतरंकृतानतिः ऋतुपर्णस्तेनभीमेनाविमान
सुदरंस्वसौधंपूजयितुमानिन्यइतिभावः इनःसूर्येप्रभौ प्रेमस्नेहः व्योम
यानंविमानोऽस्त्रीत्यमरः धामरश्मौगृहेदेहेस्थानेजन्मप्रभावयोरिति
हेमः यद्वा तेनभीमेनअयंऋतुपर्णः अर्थादस्यश्रमोमार्गोद्भवः श्रम
इतिहेतोः स्वधामनीतः कथंभूतेनमानंतेनमायाः लक्ष्म्याःअंतंवि
नाशाभावोयस्यतेनास्थिरलक्ष्मीकेणेतियावदित्यर्थः ॥ २७ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सज्जनतामहितस्य व्यग्रेतरलोकसूचितामहि
तस्य ॥ स द्विषता महितस्य द्रुतं पुरस्ये क्ष-
णा त्तताम हि तस्य ॥ २८ ॥

सज्जनेति सऋतुपर्णः सज्जनतामहितस्यसाधुत्वेनपूजितस्य यद्वा ज
नानांसमूहोजनतासतीचासौजनताचेतिसज्जनतातयामहितस्यपूजि
तस्यपूजितस्येत्यर्थः द्विषतांशत्रूणामहितस्यानिष्टस्यतस्यभीमस्य
व्यग्रेतरलोकसूचितामहितस्य व्यग्रेतरेअव्यग्रायेलोकास्तैःसूचिताप्र
काशिताआसमंतात् महिताउत्सववत्तायस्यतादृशस्यपुरस्यकुंडिन
स्येक्षणादालोकनाद्द्रुतंशीघ्रंततामग्लानिंजगाममहिनिश्चये भीमपुरस
मृध्दिदर्शनात्तमितोऽभूदितिभावः महउत्थवउत्सवः तमुग्लानावि
त्यस्यलिटिततामेति यद्वा सनलःततामग्लानिंप्रापस्वदैन्यस्मरणा
दितिभावः हितस्यइष्टस्यश्वशुरस्यपुरस्यदर्शनादित्यर्थः ॥ २८ ॥

प्रथिततमाया मायां शुचि ऽरथ वसता ऽवनु
त्तमायामायां ॥ चारुतमाया ऽमाया न्नलः
स्मर ऽन्वासमसुसमाया मायां ॥ २९ ॥

प्रस्थितेति अथानंतरंशुचिः पवित्रःकर्कोटकवस्त्रपरिधानान्नलः मा
यांलक्ष्म्यांशरीरशोभायांवाप्रथिततमायाःप्रसिध्दतमायाः असुसमा
याःप्राणसमायाः दमयंत्याः मायांव्याजंस्वयंवरमृतुपर्णाह्वानस्वाग
मप्रयोजिकांस्मरन्विचारयन् अनुत्तमायामायांअनुत्तमःश्रेष्ठआयामो
दैर्घ्ययस्यास्तादृश्यांचारुतमायामतिशयरुचिरायांवसतौगृहेवासंआ
यात्प्रापनलोभीमोद्दिष्टर्तुपर्णनिवासंदमयंत्यव्याजंस्मरन्नुत्तमांवसतिं
गतवानितिभावः प्रतीतप्रथितख्यातवित्तविज्ञातविश्रुताः वसतीरा
त्रिवेश्मनोः सुंदरंरुचिरंचारुसुषुमंसाधुशोभनम् दैर्घ्यमायामः आया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दितियातेर्लेङि यद्वा नलःचारुतमायाअत्यंतसुंदर्याः दमयंत्याःवसतीगृहेवासंमाआयात् नप्रापकिंतुरथोपरितस्थौ अत्रेयंपुराणवार्ता नलस्तात्रङ्गीमगृहंनययौकिंतुरथोपरितस्थौतच्छ्रुत्वादमयंतीप्रासादमारुह्यनलंसमीक्ष्यअतिहृष्टाबभूवइतितदेवाह ॥ २९ ॥

तं स्वनयानंतरसान्निध्यगत ऽमवेक्ष्य नुन्नयानं तरसा ॥ अभ्युदया नंत ऽरसा वधित मुदा नैषधप्रिया ऽनंतरसा ॥ ३० ॥

तमिति स्वनयानंतरसान्निध्यगतंस्वस्यात्मनोनयोनीतिःस्त्रयंवरघोषणस्यऋतुपर्णश्रावणंतदनंतरंतदुत्तरकालाविलंबेनसान्निध्यंसमीपंगतंप्राप्तंतरसावेगेननुन्नयानंप्रेरितहयंतंनलमवेक्ष्यज्ञात्वाअनंतरसाअनंतोबहुलोरसः शृंगारः स्तंभोनुरागोयस्यास्तादृश्यसौदमयंतीनैषधप्रियानैषधोनलस्तस्यप्रियाअंतर्मनसिअभ्युदयान्श्रेयांसिसुखानिवामुदाहर्षेणअधितधृतवती स्वनीत्युत्तरकालमागतंनलंबुध्वादमयंतीबहुलमानंदमवापेतिभावः शृंगारादौविषेवीर्येगुणेरागेद्रवेरसः अधितेति धात्रोलुङिरुचि ॥ ३० ॥

तंनुन्ना लीकेन स्थीयतइत्य त्र सुमुखनालीकेन ॥ किं हीनालीकेन स्वकमित्रा कृत्तरिपुजनालीकेन ॥ ३१ ॥

तनुन्नेति कृत्तरिपुजनालीकेनकृत्तानिछिन्नानिरिपुजनानांशत्रुजनानामालीपंक्तिस्तस्याःकानिशिरांसियेनतथासुमुखनालीकेनशोभनमुखपद्मेनहीनालीकेनहीनंत्यक्तमलीकंपापंयेनतेनतथा स्वकमित्रास्वकासुकेननलेनकिमत्रगृहेऋतुपर्णावाससौधेकेनसुखेनस्थीयतइतिहेतोस्तंनुन्नादमयंत्याप्रेरितासालीकेशिनीस्वनयस्यावसतिंस्वसखीदमयं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तीतस्यानिवासवेश्मानयतेत्युत्तराश्लोकस्येनसंबंधः ऋतुपर्णावास गृहेकथनलस्तिष्ठतीतिज्ञातुंप्रेषितासखीतंभैमीगृहमनयादितिभावःछिन्नंछातंलूनंकृत्तंदातंदितंछितंवृक्णं आलीसखीवयस्याच कंशिरोंबुनोःस्थीयतइतिघुमास्थागापाजहातिसांहलीतीत्वंनालीकंशरपद्मयोःअलीकंत्वप्रियेऽनृते ॥ ३१ ॥

तं साम्ना ऽमा नयतः परीक्ष्य बहुधा गुणाभिरामा न यतः ॥ स्वजनगिरा मानयतः स्ववयस्यावसति ऽमपि परा मानयत ॥ ३२ ॥

तमिति भैमीप्रेरिताकेशिनीतंनलंसान्माऽमासांत्वेनसहितंनयतः नीतिंतः बहुधानानाप्रकारेणपरीक्ष्यनलएवायमितिज्ञात्वास्ववयस्याभैम्याः वसतिंभवनमपिपरामुत्कृष्टांस्वजनगिरादमयंतीस्वजनानांगिरावाक्येनानयतानीतवती तंकंयतः यस्मात् नलात् मानयतः लक्ष्मीःप्रापयतः अर्जयतः अन्येकेपिगुणाभिरामागुणरमणीयानभवंति यद्वा कीदृशोनलः मानयतःमानेनयतः नियतःमानीत्यर्थः पुरुषश्रेष्ठंनलंनिश्चित्यभैमीप्रेषितातद्भवनंनिनायेतिभावः बंधुस्वस्वजनाः समाःअनयतेतिनीञोलङि अत्रपरीक्षायाः पुराणवार्ता भैमीकेशिनीमुवाच गच्छरथांतिकेबाहुकनामाकएषअत्रममनानाशंकाभवतितत्र गत्वापर्णादवाक्यं श्रावयसागत्वाबाहुकमुवाच त्वांदमयंतीपृच्छति यूयंकिमर्थमागताः बाहुकउवाच तस्यास्वयंवरंश्रुत्वाअयोध्यातो एकाहेनागताः पुनःकेशिन्युवाच कस्त्वंबाहुकउवाच असौवार्ष्णेयनामानलसूतआसीत् नलेराज्याद्भ्रष्टेऋतुपर्णमाश्रितः अहमप्यस्य सूतः केशिन्युवाच वार्ष्णेयोनलवृत्तांतवित् त्वंवाबाहुकउवाच नलंनकोपि जानाति ततः केशिन्यापर्णादानीतश्लोकपंचकंश्रावितंतच्छ्रुत्वातूष्णीमासएतत्सर्वंभैम्यैसाकथयामास भैमीपुनः तामुवाच

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुनर्याहिपाकार्थंजलाग्निंविनासामग्रीदेहि केशिनीतथाकृत्वानलद त्तइलोकमेकंगृहीत्वागताश्लोकोयथा ममराज्यंप्रनष्टंयत्तन्नाहं कृत वान्स्वयं ॥ कलिनैतत्कृतंभीरुयच्चत्वामहमत्यजम् ॥ १ ॥ स कलिरिदानींमांविमुच्यगतः तच्छ्रुत्वाभैमीसंदिग्धाउवाच पुनर्गत्वात च्चेष्टामनुभव सातथाकृत्वागत्योवाच ईदृक्पुरुषोनकापिदृष्टोनश्रुतः यत्स्पर्शेस्वल्पंद्रव्यंप्रचुरंभवतिकदापिशिरोनेनमति दुष्करमप्यस्यसु करंभवतिअपरंचतवपित्रामांसंप्रेरितंतस्यप्रक्षालनार्थंशून्यकुंभः प्रेरि तः सकुंभस्तत्स्पर्शात् वारिपूर्णोबभूवतेनगृहीतेतृणेअग्निर्जज्वालअ ग्निःस्पृष्टोनदहतितत्करमर्दितमपिपुष्पंनम्लायतिततःकेशिनीइंद्रसेनं तत्पुत्रंइंद्रसेनांचकन्यांनीत्वाययौ बाहुकस्तौदृष्ट्वाक्रोडेकृत्वारुरोदक्ष णात्तौत्यक्त्वाममापिसुतावीदृशौइतिजुगोपसः बाहुकेनपक्वंव्यंजनंके शिनीद्वाराआनीयास्वाद्यनलोयमितिनिश्चयमकरोत्ततःकेशिनींपु नःप्रस्थाप्यनानास्तुतिंकारयित्वागृहमानयामासेति ॥ ३२ ॥

इतियुग्मं ॥ तरसै वा ऽसा ऽवास स्वां विकृति ऽमहे र्वहन् सुवासा वा सः ॥ स्थिरभावा सा वास स्निग्धः श्वा ऽरंस्त नृपतिवासावासः ॥ ३३ ॥

तरसैवेति सुवासाःशोभनंवासोवस्त्रंयस्यतादृगसौनलःअहेःकर्कोट कस्यवासोवस्त्रंवहन्परिदधन्स्वांविकृतिंविकारंकुब्जत्ववैरूप्यादिल क्षणंतरसैवझटित्येवआसजहौ सादमयंतीवास्थिरभावानिश्चलस्वा भिप्रायाआसशुशुभे नृपतिवासेभीमगृहेअवासोनिवासोयस्यतादृक् भीमभूपसौधगतःस्निग्धःस्नेहवानरंस्तरेमेदमयंत्यासहेतिशेषः वस्त्र माच्छादनंवासः आसेतिअसुक्षेपणइत्यस्यलिटिरूपम् द्वितीयंअस गतिदीप्त्यादानेष्वित्यस्यरूपम् अरंस्तेतिरमेलङि ॥ ३३ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नृपधामनि शांतेन व्यतीत्य भैमीसमागमनिशां
तेन ॥ द्विषता ऽमनिशांतेन श्वशुरो दृष्टः श्रि
तोत्तमनिशांतेन ॥ ३४ ॥

नृपेति नृपधामनिनृपस्यभीमस्यधामनिगृहे शांतेनक्षमायुक्तेनश्रितो त्तमनिशांतेनाश्रितमुत्तमंनिशांतंगृहंयेनतादृशेन द्विषतांशत्रूणामनि शमंतोनाशोयस्मात्तादृशेनतेननलेन भैमीसमागमनिशांभैमीदमयं तीतस्याःसमागमोयत्रतांनिशांरात्रिंव्यतीत्यव्युत्क्रम्यश्वशुरोभीमोदृ ष्टः भीमगृहेदमयंतीसमागमरात्रिंव्यतीत्यप्रातर्भीममद्राक्षीदितिभावः निशांतवस्त्यसदनंभवनागारमंदिरमित्यमरः धामरश्मौगृहदेहेइतिहे मचंद्रः ॥ ३४ ॥

धृतजडिमा नेहा ऽसी दृतुपर्णो ऽपि प्रदृश्य
माने हासी ॥ आत्मसमाने हासी दभिपूज्यै
नं नलो ऽरिमानेहासी ॥ ३५ ॥

धृतेति नापुरुषःऋतुपर्णोऽस्मिन्नात्मसमानेनलेआत्मसदृशेप्रदृश्यमा नेज्ञायमानेसतिइहभीमसदसिधृतजडिमाधृतजडभावआसीत् यद्वा धृतजडिमानआसीत् अपितुजडोभूदित्यर्थः काक्वर्थेनञ् अरिमाने हासीअरीणांशत्रूणांमानेहासितुंशीलमस्येतितादृक् यद्वा अरिमाने हासीर्षोतकर्मणिधातोःप्रयोगःअरिमानस्यशत्रवभिमानस्यईहाचेष्टा तस्यानाशकइत्यर्थः हासीहास्ययुतोनलएनमृतुपर्णमभिपूज्यधनमा नादिनासंतोष्याहासीद्व्यसर्जयत् प्रातःस्वसमानेनलेदृश्यमानेऋतु पर्णोजडइवाऽभूत्हास्ययुक्तश्चनलः ऋतुपर्णसंपूज्यव्यसर्जयत पृ श्वादिभ्यइमनिज्वेतीमनिच् आसीदित्यस्तेर्लङिअहासीदितिहाके र्लङि यद्वा ऋतुपर्णःकथंभूतःअहासीहास्यरहितः अथवाहाइतिरु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वाआसीआसः आक्षेपस्तद्युक्तःहात्वयि ममापराधोजातइत्याक्षेप युक्तइत्यर्थः ॥ ३५ ॥

सासुसमासामा स स्वय मत्र पुरे नलो ऽय
ऽमासामास ॥ स्त्रीणा ऽमासा ऽमास श्रम
ममुना ऽनायि सुमुख मासा मासः ॥ ३६ ॥

सेति सअयंनलः अत्रपुरेभीमपुरेस्वयंआसामासतस्थौस्वयमित्यत्र स्वैरमितिपाठेस्वैरंस्वच्छंदंआसामासेत्यर्थः कथंभूतः सासुसमासा माअसुनाप्राणेनसमाअसुसमादमयंतीतिस्याः सामसांत्वंतेनसहितोद मयंतीकृतसांत्वः आसांस्त्रीणांस्वावरोधवधूनांश्रमंआसचिक्षेपचिर विरहजंदुःखंमपनुनोद कीदृशेन मुखतुलितमासामुखेनतुलितःस मीकृतोमाश्चंद्रोयेनतादृशेन अमुनानलेनमासोअनायिनिन्ये सनलो विरहपीडितस्यस्त्रीगणस्यक्लेशमपाहार्षीत् एवंमासोप्युच्चक्रामेतिभा वः मास्तुमासेनिशाकरेइतिहेमः आसेतिअसुक्षेपणइत्यस्यालिटि आगादितिणोलुङि अत्रेयंपुराणवार्तासऋतुपर्णस्तच्छ्रुत्वानलंज्ञात्वा सापराधःसन्नलमुवाचमत्कृतमपराधंक्षमस्वदिष्टयाभार्ययासंगतोसि नलउवाच नापराधस्तेकलिकृतमेवैतत् अश्वहृदयविद्यांगृहाणस ततस्तांगृहीत्वाअन्येनसारथिनाअयोध्यांययौनलस्तत्रमासमेकंस्थि त्वास्वपुरंगत्वापुष्करमुवाचइतितदेवाह ॥ ३६ ॥

अथ मह दाराजितया स्वपुरं चम्वा नल स्त
दा रा ऽजितया॥ सासिगदाराजितया पुष्कर
ऽमभ्यधा दुदाराजितया ॥ ३७ ॥

अथेति अथानंतरंतदानलआराजितयाअरीणांसमूहआरंतेनअजित याअपराजितयासासिगदाराजितयाअसिसहितागदाः अरिगदास्ता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सांराजिः पंक्तिस्तयासहितासासिगदाराजिस्तत्वेनराजितयाशोभित याखड्गदाराजियुक्तत्वेनशोभितयाचंम्वासेनयामहत् पुरंस्वनगरंआ रगतवान् उदाराजितयाउदारामहतीयाआजिःसंग्रामस्तस्यभावस्त त्वंतेनपुष्करंअभ्यधात्अभिगतः सनलस्तदनंतरंमहत्यासेनयापुष्करे णसंग्रामंकर्तुंजगामेतिभावः आरमितितस्यसमूहइत्याणिमस्येतिचे तिल्लोपेरूपम् पृतनानीकिनीचमूः आरेतिऋगतावित्यस्यलिटि वी थ्यालिरावलिःपंक्तिःश्रेणीलेखास्तुराजयः उदारोदातृमहतोःस्त्रियःसं यत्समित्याजिसमिद्युधः ॥ ३७ ॥

मयि गहना माया सि त्वया मनो नात्र मानि नाऽमायासि ॥ धनुरवनामाया ऽसि द्युताया लं क्क चेतना मायासि ॥ ३८ ॥

नलःपुष्करमाह मयीति हेपुष्करत्वयामयिगहनानिबिडामाया व्याजः असिक्षिप्ता क्कचित्तु मयिनानामायासिइतिपाठस्तत्रनाना विविधामायाआसिक्षिप्तेत्यर्थः त्वयात्रास्मिन्विषयेमानिनांमनोह दयमायासिआयासयुक्तंदुःखितंकृतंनअपितुदुःखीकृतम् नञ्काकर्थः धनुरवनामायधनुरारोपणाययुद्धायद्यूतायवाअलमासिसमर्थोसि क्क वाकस्मिन्विषयेचेतनांबुद्धिमायासिआगच्छसिधनुरारोपणंवाद्यूतंवा त्वमेकंकुरुयेनतेमनोऽभिलाषः तद्वदेत्यर्थः असुक्षेपणेइत्यस्याचि णिलुङि आसीति यसूपतापेऽस्यायासीति अस्तेरसीति यातेराया सीति अलंभूषणपर्याप्तिशक्तिवारणवाचकं द्यूतोऽस्त्रियामक्षवतीकै तवंपणइत्यपि यद्वा हेनानामायत्वयामानिनामनःममचित्तंआसिक्षि प्तंमाययाममनोभ्रामितमित्यर्थः अतोमायासिमापलायस्वआहु तोननिवर्तेतद्यूतादापिरणादपीतिस्मृतेरितिभावः ॥ ३८ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यु क्तोदेवनतः सोर्थ्यऽभव त्पुष्करः प्रमादे
वनतः॥ येन स विभिदे व नतः पुरा ऽवने
श्रम मपि प्रपेदे वनतः ॥ ३९ ॥

इतीति इत्यनेनप्रकारेणनलेनोक्तेगदितेप्रमादेअनवधानतायांऽवनतः आनतः यद्वाअवनतः रतः सर्वद्यूतेनैवभविष्यतीतिमन्यमानःसपुष्करःदेवनतोद्यूतेनपंचम्यास्तसिल् अर्थीप्रयोजनवानूयनेच्छुर्वाऽभवत् येनपुष्करेणसनलःपुरापूर्वमवनेः भूमेरवनतोरक्षणाद्विभिदेभिन्नः कृतःवनतोऽरण्यात्श्रममपिप्रपेदेप्राप्तवान् सपुष्करोद्यूतार्थ्यैवाभूत् येनपुष्करेण नलोभूरक्षणात्पृथक्कृतोऽरण्येदुःखचलब्धवान् देवनाःपाशकाश्चते प्रमादोऽनवधानता अवाग्रेऽवनतानतम् पदगतावित्यस्यलिटिप्रपेदेइति ॥ ३९ ॥

स च राजा यततेन द्यूतेऽसुपणे जितो ऽय
जायततेन ॥ निर्व्याजायत तेन त्यक्त श्चा ग
स्सु गतरजा यततेन ॥ ४० ॥

सचेति सचपुष्करोनिर्व्याजायततेननिर्व्याजोनिश्छद्मआयोधनागमस्तेनततेनव्याप्तेननिर्व्याजधनागमव्याप्तेनअयततेन शुभावहविधिव्याप्तेनतेनराज्ञानलेनअसुपणेअसवः प्राणाएवपणोग्लहोयस्मिंस्ताद्दशेद्यूतेजितःपराजितोव्यजायताजनिष्टत्यक्तश्चोत्सृष्टश्च कुतइत्यआह गतराजाः गतंरजोगुणोमत्सरोयस्यताद्दक्पुरुषः आगस्सुअपराधेषुपापेषुवानयततेनयत्नंकरोति प्राणपणेद्यूतेनलेनपुष्करःपराजितः उज्झितश्चेतिभावः पणोऽक्षेषुग्लहःजनीप्रादुर्भावेज्ञाह्नोर्जैतिजादेशः अजायेतेति रजोगुणेस्त्रीपुष्पेपि पापापधयोरागः यतीप्रयत्नेलटियेततेइति अत्रेयंपुराणवार्ता नलोगत्वापुष्करमुवाचराज्यंत्यजनोचेद्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वंद्यूतंवाकुरुइत्युक्तःद्यूतमकरोत् तेनपराजितः प्राणात्ययेपादानतःप्राणप्रार्थकोऽभवत्ततोनिष्कपटंज्ञात्वातेनसहसौहार्दमकरोदिति ४०

अयि भवने त्रायस्व स्वभुवं पुष्कर मुदं जने त्रायस्व ॥ युगबलनेत्राय स्वस्नेहाय पुरे व विमलनेत्राय स्वः ॥ ४१ ॥

नलःपुष्करमाह अयीति अयिकोमलामंत्रणे हेपुष्करभवनेगृहेनिवसन्स्वभुवंस्वभूमिमस्मदत्तंत्रायस्वरक्षस्व अत्रजनेजनपदलोकेमुदंहर्षमायस्वप्राप्नुहियुगबलनेत्राययुगस्ययुग्मस्यबलंसामर्थ्यंनेत्रंनायकंयस्यतादृशायविमलनेत्रायनिर्मललोचनायस्वस्नेहायस्वप्रेम्णेपुरेवपूर्वमिवस्वःभवावः हेपुष्करत्वंस्वभूमिरक्षलोकेस्निग्धोभवममतवचस्नेहःपुरेववर्धतामित्याहेतिभावः त्रैङ्पालनइत्यस्यलोटित्रायस्व आयस्वेति अयगतावित्यस्य स्वःअस्तेर्लटि यद्वा युगवलनेत्राआवयोःसेनापतिभ्यांसहस्वभवने अयस्वगच्छस्वआवांपुरेवस्नेहायस्वःभवावः कथंभूतायविमलनेत्रायविलानिनेत्राणियस्मिन्तस्मैअन्यत्पूर्ववदित्यर्थः ॥ ४१ ॥

हरिपवनयमा नस्य स्वबला दिति तुलयतो ऽनुनयमानस्य ॥ स्नेहा नयमानस्य प्रणति म धा त्पुष्करः सुनयमानस्य ॥ ४२ ॥

हरीति हरिपवनयमान् हरिरिंद्रः पवमानोवायुः यमोधर्मराट्तान्स्वबलात्स्वसामर्थ्यात्तुलयतः समीकुर्वतः अनुनयमानस्यानुमानयतःस्नेहान्प्रीतीः अयमानस्यगच्छतः सुनयमानस्यशोभननीत्यभिमानस्यास्यनलस्यपुष्करःप्रणतिंप्रह्वत्वंनमस्कारंवाइत्यनेनप्रकारेणअधादकार्षीत् एवंबहुधास्नेहंदर्शयतोऽतिवत्सलस्यपुष्करःप्रह्वोऽभवदितिभावः अधादितिदधातेर्लुङि ॥ ४२ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अरिसेनानाशस्या श्रितवत्सल ते ऽस्तु चेत
ना ना शस्या ॥ पूरितनानाशस्या स्तोकयशो
भिः कदा पि नानाशःस्याः ॥ ४३ ॥

पुष्करोनलमाह अरीति हेआश्रितवत्सलआश्रितेषुवत्सलकारुणिक अस्तोकयशोभिःअनल्पयशोभिः पूरितानानाशस्यपूरितानानाआशा दिशोयेनताद्दशस्यअरिसेनानाशस्यअरिसेनायाःनाशो ऽवसानंयस्मा त्ताद्दशस्यशत्रुबलातंकस्यतेतवस्याअशस्यानशस्याप्रशस्यास्तोतुमयो ग्याचेतनाबुद्धिर्नअस्तुनभवतुकदापिकस्मिन्नपिकालेअनाशः आशा रहितोनस्याःनभवेःहेआश्रितकृपापात्रतवास्तव्याधीर्माभूत् कदाप्या शाव्याघातस्तवमास्यादित्यर्थःआशातृष्णापियाचना स्तोकाल्पक्षुद्र काःअस्तुअस्तेर्लोटिस्निग्धस्तुवत्सलः ॥ ४३ ॥

इति स ननाम नलस्य प्रणतों घ्री फुल्लवक्त्रनाम
नलस्य॥अहिताना मनलस्य प्रययौ सार्धं तेन
नामनलस्य ॥ ४४ ॥ युग्मकं॥

इतीति इत्यनेनप्रकारेणप्रणतोनम्रःसपुष्करःनलस्यांघ्रीचरणौननाम प्रणतवान् नामसंभावनायांकीद्दशस्यनलस्यफुल्लवक्त्रनामनलस्यफु ल्लंविकसितंहर्षस्मेरंवक्त्रनामवक्त्रनामकंरूपंवानलंकमलंयस्यविक सितमुखपद्मस्य कीद्दशस्य नामनलस्यनमंननामस्तस्मिन्नलस्य तृणस्यनतौतृणप्रायस्य यद्वा नामनंनमस्कारंलातिस्वीकरोतिनामन लः तस्यलाआदानेडप्रत्ययेरूपमित्यर्थः एवमहितानामनलस्यशत्रू णामग्नेः तेननलेनसार्धंसहप्रययौगतवान्नलानुवर्तीबभूव एवंविकसि तवदनकमलस्यचरणौननामनलेनसहगतवांश्चेतिभावःनलंपद्मन्नल स्तृणे नामप्रकाशसंभाव्यक्रोधोपगमकुत्सने ननामेतिनमोर्लिटि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्वचित्तुप्रणतइत्यत्रप्रीतइतिपाठस्तत्रसंतुष्टइत्यर्थः प्रययौसार्द्धंबलेनना मनलस्यइतिपाठेनलस्यबलेनसैन्येनसार्द्धंसमंप्रययौइत्यर्थः ॥ ४४ ॥

मुदऽ ममुना ऽमुक्तेन प्राप्य सुराज्यं महा
त्मना मुक्तेन ॥ धृतनानामुक्तेन राज्यंचिरं प्राशा
सि विघट्टनामुक्तेन ॥ ४५ ॥

मुदिति आमुक्तेनवद्धकवचेनत्यक्तेनवाअमुनापुष्करेणसहमुदंप्रापले भे महात्मनांमहाशयानामुक्तेनवचनेनाविघट्टनामुक्तेनविघट्टनावियोग स्तेनमुक्तेनत्यक्तेनवियोगहीनेन धृतनानामुक्तेनधृताः नानामुक्ताः मौ क्तिकं येनताहशेननलेनराज्यंराष्ट्रंप्राशासिप्रकर्षेणशिष्टंरक्षितं तदनंत रंसकवचेनपुष्करेणसहहर्षलेभे महात्मनांवाक्येननिजराज्यंवियोग हीनेनानुशिष्टंनलेनेतिभावः मुत्प्रीतिःआमुक्तःप्रतिमुक्तश्चपिनद्धश्चापि नद्धवत् शासुअनुशिष्टावित्यस्यचिणिलुङिप्राशासीति उक्तंभाषितमु दितम् ॥ ४५ ॥

अरिसंहति रस्य वनेषु शुचां पद मापद मा
पदमा पदमा ॥ सुखदं च यथैव जनाय हरिं
यतमाय तमाय त मायत मा ॥ ४६ ॥

अरीति अस्यनलस्यारिसंहतिः शत्रुपंक्तिःशत्रुसहमूहोवनेष्वरण्येषुशु चांशोकानांपदंस्थानंआपदंविपत्तिमापल्लेभे कीदृशी अमानिःश्रीका एवमपदमाअपदास्थानरहितामालक्ष्मीर्यस्याः साअस्थिरलक्ष्मीकाइ त्यर्थः यद्वा अपगतोदमोयस्याःसाइत्यर्थः यतमायतमाय यता गतामायाकापट्यंयस्यसयतमायः अतिशयेनयतमायः यतमायतमः तस्मैजनायसुखदंतंनलंमाराज्यलक्ष्मीरायतआगता यथैवताहशा यजनायसुखदंहरिंकृष्णंमायातितथेत्यर्थः यद्वा यतमितिभिन्नंपदंय तंनियतचित्तंतं आयतमः श्रेष्ठलाभायआयत यद्वा आयतमायअ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिशयधनागमाययंततंआयतेत्यर्थः नलस्यशत्रुर्वनेवसन्दुःखितोबभूवनिर्व्याजलोकसुखदंतंनलंलक्ष्मीरागतवतीतिभावः आयतेत्ययगताविल्यस्यलङि इंदिरालोकमातामा पदंव्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुषु विपत्यांविपदापदौयमानिलेंद्रचंद्रार्कविष्णुसिंहांशुवाजिषु शुकाहिपिकभेकेषुहरिर्नाकपिलेत्रिषु ॥ ४६ ॥

नलेन पुर्यु तायता यतायता पुरे व सा ॥
सदा य मुन्महा महामहा महास्त संपदं ॥ ४७॥

इतिश्री कालिदासकृतेनलोदयेसत्काव्ये
चतुर्थोच्छ्वासः ॥ ४ ॥ ॥ ॥

अथाशीर्वादव्याजेननलोदयकाव्यसमाप्तिंसूचयति नलेनेति नलेननैषधेनसापुरीस्वीयानगरीपुरेवपूर्वमिवअतायतविस्तारिता कीदृशीपुरीअयतायताअयःशुभदैवम् नलस्येतिशेषः तस्यभावोअयतातयाआयताविशाला यदाराज्ञोनलस्यशुभदैवमभूत्तदायथापूर्वंस्वनगरीविशालाभूदितिभावः यद्वा कीदृशेननलेन अयतायताअयेनशुभदैवेनतायतिपालयतिदेवब्राह्मणादीनितिशेषः अयतायन्तेन यद्वा अयंतायतिविस्तारयतितेनसर्वदा स्वशुभशंसकेन तायृसंतानपालयोरित्यस्मात्कर्तरिशता यद्वा अयोविद्यतेयस्यासौअयः अर्शआदिभ्योजित्यच् तस्यभावोअयताशुभदैववत्त्वंतामेतिप्राप्नोतीत्ययतायन्तेन इण्गतौकर्तरिशतरीणोयणितियण् अयंनलः उन्महाउद्गततेजाःसदासर्वकालंसंपदंलक्ष्मीमहास्तप्राप कीदृशींसंपदम्महामहाम् महांतोमहाउत्सवाःयस्यांसाताम् सदैवोत्सवपरिपूर्णांसंपदंलेभेइतिभावः अतायतेतितनुविस्तारइत्यस्माद्धातोः कर्मणिलङि आत्मनेपदेतेपरेयकिंचकृतेतनोतेर्यकीतिविकल्पेनात्वेचरूपम् अहास्तेति ओहाङ्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गतौइत्यस्माद्येगत्यर्थास्तेप्राप्त्यर्थाज्ञानार्थाश्चेतिवचनेनप्राप्त्यर्थात्लुङि आत्मनेपदेतेपरेसिचिकृते रूपम् पूर्यतेतिदीर्घपाठेपूःपुरीयताप्राप्ताक थंभूताआयताविशालेत्यर्थः पूःस्त्रीपुरीनगर्यौवाइत्यमरः ॥ ४७ ॥

इतीति इतिसमाप्तौकालिदासेतिकविनामकथनम् सत्काव्यइतिम हाकाव्यभिन्नत्वसूचनम् उच्छ्वासः श्वाससाध्यः परिच्छेदः समाप्तइ त्यर्थः मिश्रानंदकरस्त्वासीन्महोपाध्यायलक्षितः ॥ पुण्यग्रामसभाजे तायष्टावाणिमयःसुधीः ॥ १ ॥ वेदेनैवविधिंकविंनयरुतैस्तर्केणवाचस्प तिंवेदांतेनशिवंमनुंस्मृतिमरे ज्योतिश्चयैर्भास्करं ॥ व्याकृत्येनफणाधरं क्षितिधरंनागाधिपंछंदसाधर्मोयस्यविजेतुमंचतिपरंसांख्येनचार्वाक पं ॥ २ ॥ तत्सूनुःसुकृतीक्षितीश्वरकृपापात्रःसुहृत्पालकोनानाशास्त्रर तोमहापदयुतोपाध्यायसंज्ञान्वितः ॥ सत्तर्कायतकाननोद्यतबलद्वादी द्रदंतावलश्रेणीमर्दनचातुरीचणहरिर्विद्याकरोमैथिलः ॥ ३ ॥ त स्यात्मजोभूद्विबुधाग्रगंताप्रज्ञाकरःसज्जनतापहंता ॥ गुणालयः श्री शपदानुमंताशास्त्रेषुदक्षःकुधियांनियंता ॥ ४ ॥ स्वल्पेनवयसातेनकृ ताटीकासुबोधिनी ॥ पूर्वाचार्यकृतीर्वीक्ष्यसुधियांपश्यतांमुदे ॥ ५ ॥

इतिमैथिलश्रीप्रज्ञाकरमिश्रप्रणीतायांनलोदयकाव्यटीकायांसुबोधि धिन्यांचतुर्थउच्छ्वासः समाप्तेयंसुबोधिनीटीका ॥ ॥

महत्कूटैस्तुयुक्तस्यकाव्यस्यैतस्यपुस्तकं ॥
पदच्छेदैश्चसहितंपूर्वंनासीदतःपुनः ॥ १ ॥
परीक्षायांसुबोधायअनंभट्टेनआंकितं ॥
पदच्छेदान्कारयित्वाशोधयित्वाचपंडितैः ॥ २ ॥

इदंपुस्तकंकशळीकरोपनामरामकृष्णात्मजअनंतेनअंकितम्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अगाऊ वर्गणींदारांचीं नांवें.

१	रा० शांताराम मंगेश.	२
१	रा० नारायण भिकाजी	५
१	रा० रामचंद्र आबाजी.	१
१	रा० रामशंकर देसाई.	१
१	रा० वसंतराव बापूजी विजयकर.	१
१	रा० विठ्ठल खंडेराव वकील.	१
१	रा० अनंत नारायण पाठकर.	१
१	रा० प्रल्हाद नारायण जोग.	१
१	रा० विष्णुरामचंद्र लळित.	१
१	रा० नारायण बाळकृष्ण.	१
१	रा० नारायण सदाशिव.	१
१	रा० बाळकृष्ण गोपाळ.	१
१	रा० विष्णु विनायक शार्ङ्गपाणी.	१
१	रा० महादेव अनंत साठे.	१
१	रा० जनार्दन सुंदरजी.	१
१	रा० भिकू राघोबा.	१
१	रा० द्वारकानाथ सखाराम.	१
१	रा० पर्शुराम बल्लाळ जोशी.	१
१	रा० केशव विश्वनाथ पटवर्धन.	१
१	रा० वासुदेव कृष्ण धैर्यवान.	१
१	रा० गणपत गोपिनाथ.	१
१	रा० पाडूरंग विष्णु पंडित.	१
१	रा० हरी सखाराम फाटक.	१
१	रा० वरदराजराजशास्त्रीजाभेकर	१
१	रा० महादेव आपटे मास्तर.	१
१	रा० अंबालाल साखरलाल.	१
१	रा० जगन्नाथ माधवराव.	१
१	रा० सुराभाई मेथा.	१
१	रा० खोडिदास नेमिदास.	१
१	रा० हरि महादेव पंडीत.	१
१	रा० लालजी नारायणजी.	१
१	रा० रतनजी वालजी.	१
१	रा० रामचंद्र वसंतराव.	१
१	रा० वासुदेव रामचंद्र.	१
१	रा० विनायक श्रीकृष्ण.	१
१	रा० मथुरादास वसं दास.	१
१	रा० त्रिपुरा शंकर.	१
१	रा० वसंजी गोपाळ.	१
१	रा० गणेश व्यंकटेश.	१
१	रा० गणेश महादेवशास्त्री.	१
१	रा० मोरेश्वर जनर्दन डाक्तर.	१
१	रा० सदाशीव गोपाळ.	१
१	रा० सगुण आत्माराम.	१
१	रा० शामराव पांडुरंग.	१
१	रा० धुंडिराज विनायक.	१
१	रा० भगवंतराव मंगेश वाघळे.	१
१	रा० गोकर्णमहाबळेश्वर.	१
१	रा० जनार्दन रामचंद्रजी.	१
१	रा० घनश्याम नीलकंठ नाडक.	१
१	रा० रामचंद्र लक्षुमण.	१
१	रा० कल्याणराव दौलतराव.	१
१	रा० बापूजी एकनाथ.	१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१	रा० नारायण कृष्णराव	१	१	रा० अनंतराव लक्षुमण.	१
१	मि० जानउलीसन साहेब	१	१	रा० बाबु रामचंद्रवकील.	१
१	रा० प्रभाकर श्रीधर	१	१	रा० माधवराव भास्करजी.	१
१	रा० गोविंद हरी	१	१	रा० पाडुरंग विष्णु पंडित	१
१	रा० बाळशास्त्री	१	१	रा० आपाजी बाबुराव	१
१	रा० रामकृष्ण गोविंद	१	१	रा० नारायण बापुजी	१
१	रा० कृष्णशास्त्री खांडेकर	१	१	रा० गुलाबभाई गोपाळजी	१
१	रा० केशव दिनकर	१	१	रा० नरसिराम जयकर	१
१	रा० विठ्ठलराव वामनराव	१	१	रा० मोतीलाल मोहनलाल	१
१	रा० गंगाधर गोविंद	१	१	रा० विनायक लक्षुमण कीर्तीकर	१
१	रा० विश्वनाथ विनायक	१	१	रा० छबीलायाराम दौलतराव	१
१	रा० श्रीधर भास्कर	१	१	रा० कृपाळदास खेमचंद्र	१
१	रा० पाडुरंग धोंडदेव	१	१	रा० शिवराम विठ्ठल भांडार	१
१	रा० मनसुखराम सूर्यराम	१	१	रा० गोगल वनमाळी	१
१	रा० पुरुषोत्तम पाडुरंग	१	१	रा० बळवंतराव महादेव	१
१	रा० कल्याणदास	१	१	रा० गणेशभिकाजी गुंजीकर	१
१	रा० वामनकेशव मालवणकर	१	१	रा० नारायण कृष्ण गुंजीकर	१
१	रा० गणपत गोपीनाथ	१	१	रा० शंकर पांडुरंग पंडीत	१
१	रा० महादेव सखारावमभावे	१	१	रा० गोपाळरावजी टिळक	१
१	रा० गोविंद धोंडदेव	१	१	रा० गोविंद सखाराम	१
१	रा० सिताराम सदाशिव	१	१	रा० विठ्ठल रघुनाथ.	१
१	रा० कृष्णराव महादेव	१			

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

र भ

पाडुरंग ६ १

१ रा० मनसुखराम सूर्यराम १

१ रा० पुरुषोत्तम पाडुरंग १

१ रा० कल्याणदास १

१ रा० वामनकेशव मालवणकर १

१ रा० गणपत गोपीनाथ १

१ रा० महादेव सखारावमभावे १

१ रा० गोविंद धोंडदेव १

१ रा० सिताराम सदाशिव १

१ रा० कृष्णराव महादेव १

१

१

१ रा

१ रा० विठ्ठल

—००—

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi